कर्नाटकसारस्वतोपासकाः
परिचयग्रन्थमाला

१

जग्गु शिङ्गरार्यः

डा. एच्.आर्. विश्वासः



KARNATAKA SAMSKRIT UNIVERSITY

डा. एच्.आर्. विश्वासः

कर्णाटके चिक्कमगलूरुजनपदे १ मार्च् १९५९ तमे वर्षे प्राप्तजन्मा श्रीमान् विश्वासः साहित्यविषयमधिकृत्य विद्वान् इति उपाधिं बेङ्गलूरुविश्वविद्यालयात् स्नातकोत्तरपदवीं च प्राप्तवान् अस्ति। कुवेम्पुविश्वविद्यालयात् डाक्टरेट्पदवीमपि अधिगतवता तेन संस्कृत–सम्भाषणान्दोलनस्य आरम्भकालादपि पूर्णकालिकसेवव्रतिरूपेण सेवा क्रियमाणा अस्ति। आधुनिकसंस्कृतसाहित्यविषये महतीं रुचिं वहता तेन विख्यातायाः "सम्भाषणसन्देश" मासपत्रिकायाः सम्पादकरूपेणापि कानिचित् वर्षाणि कार्यं कृतम् ।"विलपति गङ्गा" अस्य प्रथमः कथासङ्ग्रहः अस्ति ।

अनेन लेखकेन नैकानि पुस्तकानि लिखितानि। कन्नडभाषायां "ध्वनि" इति लघुकथासङ्ग्रहः,"मूल" इति कादम्बरी,"मत्ते होत्तितु हिब्रू हणते", "सङ्गत", "पिडिदु संस्कृत सूत्रव" इत्यादि कन्नडकृतयः विरचितानि। तथैव संस्कृत–भाषायां अभ्यासपुस्तकं, कालबोधिनी, प्रयोगाः इति व्याकरणसम्बद्धपुस्तकानि, सरलभाषया पञ्चतन्त्रकथा, हितोपदेशकथा इति कथासाहित्यं, कविकोपकलापः, मार्जालस्य मुखं दृष्टम् इति संस्कृत नाटकानां सङ्ग्रहः इत्यादि अनेन लेखकेन रचितानि पुस्तकानि ।

लखनऊ, भावूराव्देवरस्न्यासतः "युवसाहित्यपुरस्कारः", एस्.एल्. भैरप्पमहाभागस्य आवरण कादम्बर्याः संस्कृत अनुवादार्थं केन्द्रसाहित्य–अकाडमीद्वारा २०१० वर्षस्य "अनुवादप्रशस्तिः" प्रदत्ता। अपि च कन्नडसाहित्यपरिषत्, कोप्प, ललितकलाकलाविदसन्मानसमिति, बाळेहोळे इत्यादिभिः संस्थाभिः गौरवसम्मानानां भाजनम् अयम् ।

डा. एस्.एल्. भैरप्पवर्यस्य प्रसिद्ध कन्नडकथनकारस्य पर्वनामिकायाः बृहत्कथायाः संस्कृतानुवादेन महतीं कीर्तिम् आप्नोत् ।

लेखकोऽयं संस्कृतभारत्याः अखिलभारतप्रशिक्षणप्रमुखः वर्तते। अपि च कर्णाटकसंस्कृतविश्वविद्यालयस्य प्रशासनसमितेः सदस्यः च ।

कर्नाटकसारस्वतोपासकाः
परिचयग्रन्थमाला

कविवर्यः जगु शिङ्गरार्यः

डा. एच्.आर्. विश्वासः

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः, चामराजपेटे
बेङ्गळूरुः–५६००१८

JAGGU SHINGARARYA

Author: Dr. H. R . Vishwas
Sanghaniketana, Pratapanagaram, Mannugudda,
Mangalore - 575003

Published by

Prasaranga
Karnataka Samskrita University
Pampa Mahakavi Road,Chamarajpet
Bangalore - 560018
Ph.: 080 - 2670 1303, 26705387

© Reserved

Copies can be had from:

Samskrita Bharati
'Aksharam', 8th Cross, 2nd Stage,
Girinagar, Bangalore - 560085.
Phone: 080 - 26722576 / 26721052

First Impression: 2013

Paper used: 70GSM NS book print

Copies: 1000

Page: vi + 78 = 84

Price: Rs. 50/-

ಸ್ವಾನ್ ಪ್ರಿಂಟರ್ಸ್
www.svanprinters.com
☎ 080 - 2674 2233

कुलपतिवचनम्

जानन्त्येव हि तत्रभवन्तो भवन्तः प्राग् वर्षत्रयात् लब्धजन्मनः टकसंस्कृतविश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं वेदवेदान्तादि- त्रेषु उन्नताध्ययनव्यवस्थापनं,शोधकार्यञ्चेति । विशिष्य एतद्द्वारा त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यास-ग्रन्थ- शनादियोजनाभिः प्रयासः विहितः ।

संस्कृतभाषा, तत्साहित्यं, शास्त्रसम्पत् च अगाधशेवधिः । खननेन कं वर्धते । एतस्य निधेः सम्यगवगमनं यथा प्रधानं, तथा तस्य गुपयोगः अपि प्रधानतामाप्नोति इति वयं जानीमः । टकसंस्कृतविश्वविद्यालयः शासनाङ्गं, शैक्षणिकाङ्गं, प्रसाराङ्गम् ति अङ्गत्रयं भजते । शासनाङ्गे कन्नडं, संस्कृतं आङ्ग्लं चेति णामपि भाषाणां परिक्रमः प्रचलति । शैक्षणिकाङ्गे क्वचित् कन्नडस्य, कं संस्कृतस्योपयोगः भवेत् । प्रसाराङ्गे तु कन्नडसंस्कृतेः त्रसम्पन्नतार्थं संस्कृतस्य प्रधानग्रन्थानां कन्नडानुवादः आवश्यकः। अपूर्वग्रन्थानां आङ्ग्लभाषयामपि अनुवादः, संस्कृते न्त्रग्रन्थप्रकटणं च अस्माकं अग्रिमलक्ष्यं भवेत् ।

विश्वविद्यालयः प्राचीन-आधुनिकज्ञानयोः युक्तसंयोजने दत्तावधानः। न्येन एतत् शैक्षणिकाङ्गे भवेत् । केवलं परीक्षाप्रचालनं णिकाङ्गस्य लक्ष्यं न । तदर्थं योग्यं पाठ्यं पूरकपाठ्यरचना, र्शनग्रन्थनिर्माणम् अपि प्रधानं भवति । एतदर्थं इदानीं प्रसाराङ्गः ब्धः ।

कर्नाटकराज्यं बहु प्राचीनकाले अनल्पान् संस्कृतग्रन्थान् असृजत्। कालीनसन्दर्भेऽपि तत् समेधितं च । आधुनिककाले तु तस्य

नूतनरीत्या अभिवर्धनस्यावश्यकता वर्तते । कर्नाटकरा
अभिलषितार्थचिन्तामणिः, शिवतत्वरत्नाकरः इति बृहद्विश्वको
प्रायच्छत्। शतशः शास्त्रकाराः, व्याख्यानकाराश्चाभवन् अस्मिन्
अनेके शास्त्रग्रन्थाः निर्मिताः। शताधिकाः व्याख्यानकाराः सं
अन्यादृशव्याख्यानानि व्यरचयन्।

कर्णाटकराज्यस्य सुदीर्घे वाङ्मयेतिहासे अतिविशिष्टेन योग
नक्षत्रायमानाः अनेके महान्तः विद्यन्ते । इदं संस्कृतसाहित्ये
स्वातन्त्र्यपूर्वकालीनयुगस्य संस्कृतसाहित्येतिहासं समीचीनतया चित्र
किन्तु स्वातन्त्र्यसङ्ग्रामस्य कालघट्टे प्रवृत्तस्य संस्कृतसाहित्यसर्ज
इतिवृत्तरचना सम्यक् न जाता । कालक्रमेण इदम् अन्धकारयु
सम्पद्येत कदाचित् । अस्मात् कारणात् १८५० तः १९५० प
एकस्य शताब्दस्य कालखण्डे कर्नाटकस्य विविधेषु प्रदेशेषु निव
संस्कृतवाङ्मयस्य महत्तां वर्धयितुं कारणीभूतानां महतां योगदान
तेषां जीवनगाथाविषये च शतं पुस्तकानि प्रकाशनीयानि इति अस्म
आशयः । अनया योजनया संस्कृतवाङ्मयस्य नवेतिहासः नि
भविष्यति। एतेन, आधुनिकयुगेन सह गतशताब्दस्य सांस्कृतिकब
दृढो भविष्यति इति मे विश्वासः।

अस्यां ग्रन्थमालायां डा. एच्.आर्. विश्वासमहोदयेन
शिङ्गैय्यङ्गार् महोदयानां संस्कृतयोगदानमधिकृत्य विरचितं पुस्त
प्राकाश्यं नीयते। विद्वद्वरेण्यः कविः डा. विश्वासमहोदयः
संस्कृतभाषासेवायां रतः शताधिकप्रबन्धकर्ता अनुवादकर्मणि निष
अस्माकं प्रार्थनानुरोधेन ग्रन्थपुष्पिकामिमां अल्पे काले वि
प्रदत्तवानिति तस्मै महाभागाय कार्तज्ञ्यं निवेदयामः ।

प्रो. मल्लेपुरं जि. वेङ्कटेशः,

कु

कविः जग्गु शिङ्गरार्यः

कविपरिचयः

तखण्डस्य सम्पद्भूतायाः संस्कृतभाषायाः समुपासकाः सहस्राधिकाः
य देशस्य विविधेषु भागेषु जनिमलभन्त । भारते प्रायः तादृशं राज्यं
च्च येन केनापि वा संस्कृतकविना भूषितं नाभूत् । कर्णाटदेशस्तु आ
नैकेषां संस्कृतविदुषामावासस्थानमेवास्ति । अधुनापि स्वीयैः कृतिरत्नैः
ंवर्धयन्तः पण्डितकवयः अत्र वर्तन्ते । गतशताब्द्यां सुरभारत्याः सेवां
ीन कृतवत्सु कवितल्लजेषु प्रमुखं स्थानं भजते जग्गु शिङ्गरार्यः ।
मण्ड्यजनपदे वर्तमानं यदुशैलापरनामधेयं मेलुकोटेक्षेत्रं प्राचीन–
भाषायाः महत् क्षेत्रमित्येव प्रसिद्धम् । संस्कृतस्य अध्ययनम् अध्यापनं
। तत्र प्रवर्तते । चलुवनारायणस्वामिनः आवासस्थानभूते तस्मिन् पवित्रे
ार्यनामकः पण्डितः उवास । तस्य पुत्रः तिरुनारायण अय्यङ्गार्यः ।
य पुत्रः एव शिङ्गरार्यः इति ख्यातः शिङ्गरैय्यङ्गार्यः । जग्गु इत्येतत्
जग्गु शिङ्गरार्यः 20.10.1891तमे दिनाङ्के जन्म प्राप्नोत् ।
पितृव्यः (जग्गु तिरुनारायण अय्यङ्गार्यस्यानुजः) जग्गु वेङ्कटाचार्यः
नः मैसूरुमहाराजस्य आस्थानविद्वानासीत् । मेलुकोटेक्षेत्रे स्थितायां
लायां सः अध्यापकः आसीत् । एषः वेङ्कटाचार्यः एव शिङ्गरार्यस्य
। शिङ्गरार्यस्य बाल्यं निर्धनतायामेव यापितमभूत् । मेलुकोटेक्षेत्रे
यप्राथमिकशालायां तस्य विद्याभ्यासः आरब्धः । तत्रैव माध्यमिक–
प्तवान् । अनन्तरं च सः मेलुकोटेसंस्कृतमहापाठशालां प्रविष्टवान् ।
ारार्यः तत्र अष्ट वर्षाणि यावत् श्रद्धयाधीत्य संस्कृतभाषायां काव्य–
ीचीनं ज्ञानं समपादयत् । तदनन्तरं प्रगताध्ययनाय मैसूरुनगरं गत्वा
ाजसंस्कृतमहाविद्यालये कानिचित् वर्षाणि यावत् अध्ययनं कृत्वा
प्राप्नोत् ।

विद्याभ्यासस्य समाप्तेः अनन्तरं तेन द्वित्राणि वर्षाणि यावत् देशाटनं कृतम् । समग्रे भारते तेन यात्रा कृता । रिक्तहस्तः सन् अपि स्वस्मिन् स्थिते विद्याधने एव विश्वस्य सः सर्वत्र पर्यटनमकरोत् । अनेन सः अपारं लोकानुभवं प्राप्तवान् । एवं पर्यटता तेन यदा लाहोर्नगरं प्रति गतं तदा तत्रत्यः तदानीन्तनः अधिकारी (दिवान्) राव्बहद्दूर-नामकः शिङ्गरार्यस्य पाण्डित्यं प्रतिभां च ज्ञात्वा अतीव सन्तुष्टः सन् तस्मै 2000 नाणकानि उपायनरूपेण दत्तवान् । 1914-1915तमयोः वर्षयोः तेन मद्रास्नगरे अडेयार्-ग्रन्थालये स्थित्वा संशोधनकार्यमपि कृतम् ।

देशाटनं परिसमाप्य प्रत्यागतः शिङ्गरार्यः आदौ नागमङ्गलनगरे माध्यमिकशालायां संस्कृताध्यापकत्वेन नियुक्तोऽभूत् । गच्छता कालेन तेन तुमकूरु, कुणिगल् तिपटूरु, दोड्डबळ्ळापुरम् - इत्येतेषु नगरेष्वपि उद्योगः कृतः । शिङ्गरार्यस्य पत्नी श्रीमती वेङ्गडम्मा अत्यन्तमनुकूला । पत्युः अध्ययनाध्यापनादिकार्येषु कोऽपि विघ्नः यथा न भवेत् तथा सा सहकरोति स्म । दारिद्र्ये सत्यपि सन्तोषेण एव तौ दम्पती जीवनं कृतवन्तौ । तयोः अष्ट पुत्र्यः एकः पुत्रश्च । सेवानिवृत्तेः अनन्तरं शिङ्गरार्यः तुमकूरुनगरे स्वगृहे निवसति स्म । तत्रैव स्वकीये चतुर्णवतितमे वर्षे (1985) सः पञ्चत्वं प्राप्नोत् ।

आ बाल्यादपि शिङ्गरार्यः स्वाभिमानी स्वातन्त्र्यप्रियश्च । तस्य जीवनमतीव सरलं निराडम्बरं च । प्रकृतिविषये, जन्मभूमिविषये, देवविषये च तस्य अपारा श्रद्धा । अतिथि-सत्कारे सः अत्यन्तं प्रसिद्धः । अध्यापनेन सह निरन्तरम् अध्ययनं ग्रन्थरचनं च सः करोति स्म । बन्धुभिः विद्वद्भिश्च सह सः सर्वदा काव्यशास्त्रविनोदे रतो भवति स्म । शास्त्रकुतूहलं, ज्ञानपिपासां च सः स्वजीवने आन्तं रक्षितवान् । अतीव साम्प्रदायिकी जीवनशैली तस्य आसीत् चेदपि असाम्प्रदायिकानां विषये तस्य कोऽपि विरोधः न आसीत् । सर्वान् अपि समानभावनया एव सः पश्यति स्म ।

स्वजीवितावधौ शिङ्गरार्येण बहूनि सम्माननानि प्राप्तानि । तेषु कानिचित् -

* मैसूरुमहाराजनाल्वडिकृष्णराज-ओडेयर्द्वारा राङ्कवदानेन सम्माननम् ।
* शृङ्गेरीजगद्गुरुभिः राङ्कवप्रदानेन सम्माननम् ।
* 1979तमे वर्षे कर्णाटकराज्यप्रशस्तिः ।
* 1979तमे वर्षे बेङ्गलूरुनगरस्थात् सारस्वतमहाविश्वविद्यालयतः 'प्रत्न-विद्याविचक्षणः' इति बिरुददानपूर्वकं सम्माननम् ।
* 1983तमे वर्षे कर्णाटकशासनेन मासिकगौरवधनदानेन सम्माननम् ।

काव्यपरिचयः

जगु शिङ्गरार्येण गद्यं पद्यं चम्पूः नाटकं चेति सर्वेऽपि काव्यप्रकाराः स्वकृतिभिः वर्धिताः सन्ति । तेषां संक्षिप्तः परिचयः अत्र प्रस्तूयते –

अ. नाटकानि

1. शौरिशौर्यम्

थासारः

थमोऽङ्कः

सूत्रधारः प्रविश्य 'हरिर्नः पायात्' इति नान्दीश्लोकं पठति । ततः प्रविशति कंसः । ोधान्धः सः पुरतः विद्यमानं प्रदेशमपि नाभिजानाति । तत्र आगमनकारणमपि स्मरति । नर्मसचिवः विदूषकः पुष्करः एव तं स्मारयति यत् 'मनोविनोदनाय नर्तक्योः त्यं द्रष्टुमागतमावाभ्याम्' इति । परन्तु चिन्ताव्यग्रः कंसः इदानी नृत्यं नेच्छति । सचिवं बुद्धमतिं तत्र आकार्य तं 'सेनाधिपतिं चण्डदण्डं युद्धाय सैन्यं सज्जीकर्तुमाज्ञापय' ते वदति । परन्तु 'गोकुलविनाशनाय चतुरङ्गबलसहितसैन्यस्य प्रयोगः मशकस्योपरि ह्मास्त्रप्रयोगोद्यमः' इति सचिवोक्तिमङ्गीकृत्य युद्धविचारात् विरमति ।

'देवकी इतःपूर्वमेव मया मारणीयासीत्' इति पश्चात्तापमनुभवति कंसः । अत्रान्तरे दूषकस्य तु बुभुक्षा । परन्तु कंसाय आहारः एव न रोचते । सचिवः महाराजस्य न्तापरिहाराय गोकुले जातानां सर्वेषामपि अर्भकाणां मारणस्य उपायं सूचयति । तना तत् कार्यं साधयितुमर्हति इत्यपि सः निवेदयति । कंसः तथैव निश्चित्य विश्रान्तये तः प्रतिष्ठते ।

तीयोऽङ्कः

कृष्णभयात् कंसः अस्वस्थः भवति । राजवैद्यः तस्मै औषधं ददाति, परन्तु सः नाति यत् महाराजस्य न कोऽपि व्याधिः, अपि तु आधिः इति । तमेव अंशं राजकुल–धानचेटी सोमलतां निवेद्य गच्छति सः । महाराजस्य मनोविनोदनाय मदिरोत्सवः चरणीयः इति सचिवैः निश्चीयते । ततश्च अङ्गनाः मदिरामानीय यच्छन्ति । कंसः नः पुनः पिबति । 'भवानपि पिबतु' इति सः पुष्करम् अनुरुणद्धि । कंसः अत्यधिकं बति । 'गायत, नृत्यत' इति सर्वाः अङ्गनाः आज्ञापयति । अनन्तरं च पानमत्तः सन्

उन्मत्तः इव व्यवहरति । 'उत्प्लुत्योत्प्लुत्य नृत्यत' इत्यादिश्य स्वयमपि नृत्यति । कामान्धः सन् काञ्चित् नर्तकीं चुम्बितुमपि प्रयतते । तदा सर्वाः नर्तक्यः भयात् ततः पलायन्ते । खिन्नः पुष्करः 'अति सर्वत्र वर्जयेत्' इति वचनं स्मरन् कथमपि महाराजं तत्रैव शयने शाययति । महाराजः शनैः निद्रावशः भवति ।

तृतीयोऽङ्कः

सचिव–पुष्करयोः मध्ये विचारविमर्शः प्रचलति । महाराजस्य मनोविनोदनाय 'पञ्चषदिनानि यावत् केवलम्' इति कल्पितः मदिरोत्सवः विंशतिदिनेषु अतीतेष्वपि न समाप्तः । महाराजः मदिरामत्तः सन् अन्तःपुरस्त्रीषु 'स्वपत्न्यः काः, चेट्यः काः' इति तारतम्यमपि अजानन् सर्वासु अतिक्रमं कर्तुं प्रयतते । अत्रान्तरे नारदमहर्षिः तत्र प्रविशति । नारदं विलोक्य सर्वाः ललनाः लज्जाभयाकुलितहृदयाः ततः पलायन्ते । कंसः नितरां क्रुद्धः भवति । अनुमतिं विना अन्तः प्रविष्टं नारदं देशकालाचारानभिज्ञं मूर्खं मन्यते सः । परन्तु सचिवस्य प्रबुद्धमतेः वचनं श्रुत्वा, अनन्तरं नारदं स्वागतीकरोति । तेन सह विनयेन सम्भाषणं करोति च ।

कंसः नारदं कृष्णस्य जननकारणात् उपस्थितं महत् भयं निवेद्य 'निवारणोपायं भवान् सूचयतु' इति प्रार्थयते । नारदः दैवगतेः अन्यथयितुमशक्यत्वं विवृत्य 'शौरिस्तु स्वयं भगवान् नारायणः एव, अतस्तमेव शरणं गच्छ । तदनुग्रहपात्रं भव । सः त्वां रक्षति ; अन्यथा विनश्यसि' इति हितमुपदिश्य ततः गच्छति । कंसः अन्येषां मन्त्रालोचना–श्रवणेनालमिति निश्चित्य कृष्णहननाय अनेकान् राक्षसान् गोकुलं प्रति प्रेषयति ।

चतुर्थोऽङ्कः

वृन्दावनं गत्वा ततः प्रत्यागतः अक्रूरः प्रविशति । कृष्णस्य महिमवर्णनं कुर्वतः तस्य मुखात् कृष्णेन प्रदर्शिताः अमानुषलीलाः, तेन कृतं पूतना–शकट–वत्स–तृणावर्तादीनां राक्षसानां मारणं च ज्ञातं भवति । कालियमर्दनवृत्तान्तोऽपि ज्ञातः भवति । अनन्तरं च अक्रूरः निश्चिनोति यत् 'अहं केनापि उपायेन कंसमेव व्रजं नीत्वा तत्र श्रीकृष्णस्य स्वरूपं प्रत्यक्षमेव दर्शयामि, येन कंसस्य मनोवृत्तिः शुभात्मिका भविष्यति' इति ।

अत्रान्तरे कंसमहाराजः ततः चण्डदण्ड–घोरास्य–क्रूरदृष्टि–निशितदंष्ट्र–भाण्डोदर–नामकान् सेनानायकान् राक्षसान् कृष्णस्य मारणाय प्रेषयति । अक्रूरेण पुनःपुनरुपदिष्टः सः अन्ते नारदोक्तिमपि स्मरन् कृष्णस्य महिमानमङ्गीकरोति इव । तदा 'सकृत् गोकुलं प्रविश्य कृष्णस्य चेष्टितं स्वयमेव पश्य' इति अक्रूरः तं प्रेरयति । कंसोऽपि 'घोषयात्रा–

ञ्चरन् तत्रत्यं वृत्तं पश्यामि' इति निर्णयति । अक्रूरमपि आत्मना सह
ोकुलं गच्छति । ततश्च यमुनातीरे कृष्णस्य निवासभूतं वृन्दावनं गच्छति ।
वृतं क्रीडन्तं कृष्णं दर्शयति अक्रूरः । यदा कंसः क्रोधवशात् तीक्ष्णदृष्ट्या
तदा तु कृष्णगतेन महता तेजसा निरुद्धदृष्टिः सन् तं द्रष्टुमेव न शक्नोति ।
ूरस्य अनुभवः अपरः एव । तस्य तु कृष्णमूर्तिः चन्द्रबिम्ब इव आह्लादमेव
पि प्रशान्तमनसा भक्तिभावेन तं कृष्णं पश्यतु' इति सः कंसं वदति ।
ते ।

ते वनिताजनमध्यगतः कृष्णः । भक्तिपरवशः कंसः तं पुनःपुनः स्तौति ।
् स्वसमीपम् आगतं कृष्णं सः निवारयति । 'भवान् देवः, अहं च तव
। कृष्णः विनोदेन तं वदति – 'अज्ञाः मां महिमान्वितं मन्यन्ते, भवान्
' इति । कंसोऽपि 'तादृशेन मायापाशेन मां पुनः मा बध्नातु' इति तं
धपूजामहोत्सवं प्रति बलरामेण साकं भवतागन्तव्यम्' इति निवेदयति
ानात् गन्तुमनिच्छुकः इव पुनः पुनः कृष्णमेव पश्यन् कथमपि प्रतिष्ठते ।

तः नन्दगोपः प्रविशति । तस्य वचनादिदं ज्ञायते यत् कंसस्य निमन्त्रणम्
ः बलरामेण साकं मथुरानगरं गतः अस्ति । रुदतीः गोपीः परिसान्त्व्य,
यशोदां प्रणम्य गतस्य तस्य एतावत्पर्यन्तं कापि वार्ता नागता । अतः
ाकुलो भवति । अन्ते च 'अहमेव मथुरां गत्वा सर्वं ज्ञास्यामि' इति
ः भवति । तदा प्रविशति हर्षपरवशः अक्रूरः ।

पि कंसवधादिवृत्तान्तं विस्तरेण श्रावयति । वृन्दावने कृतेन कृष्णदर्शनेन
ः कंसः कृष्णे द्वेषं परित्यज्य अन्तरङ्गो तस्य भक्तः एव बभूव । ततश्च
ष्णस्य करकमलेनैव मरणं युक्तरूपमिति विचिन्त्य सः निजशौर्य–
कृष्णेन सह मल्लयुद्धं कृत्वा मरणं प्राप्तुमैच्छत् । तदर्थं कृष्णबलरामौ
रमेव प्रेषयामास ।

विष्टः कृष्णः कुब्जागन्धानुलिप्ताङ्गः सन् राजभवनमागतवान् । कंसः
स्वागतं कृतवान् । ते सर्वेऽपि मिलित्वा आयुधपूजां कृतवन्तः । अनन्तरं
दिदृक्षया एव मया कुवलयापीडनामकेन गजेन, चाणूरमुष्टिकनामकाभ्यां
युद्धम् आयोजितमस्ति' इति कंसः वदति । सबलरामः कृष्णः लीलयैव

तान् त्रीनपि यमसदनं प्रेषितवान् । ततः कंसः बाहुयुद्धाय कृष्णमाकारयामास । युद्धे मुष्टिप्रहारेण कृष्णः कंसममारयत् । समग्रमपि एनं वृत्तान्तं वर्णयित्वा तदनन्तरम् अक्रूरः नन्दगोपं वदति 'कृष्णस्य मातापितरौ न तु भवन्तौ, अपि तु देवकीवसुदेवौ ; भवन्तौ तत्परिपोषकौ' इति । तदनन्तरं तौ, कृष्णबलरामौ, सचिवादयश्च सर्वेऽपि कारालयसमीपं गच्छन्ति । देवकीवसुदेवयोः बन्धविमोक्षः भवति । भरतवाक्येन नाटकं समाप्तं भवति ।

पात्रचित्रणम्

शिङ्गरार्येण स्वीयेषु नाटकेषु पात्रचित्रणं अत्यन्तं कुशलतया कृतमस्ति । तस्य निदर्शनत्वेन अस्य नाटकस्य पात्रद्वयं परिशील्यते ।

शौरिः

नाटकस्य अस्य नायकः शौरिः कृष्णः इति तु नाम्नैव ज्ञयते । तथापि प्रथम-द्वितीय-तृतीयाङ्केषु शौरेः प्रवेशः एव न भवति । परन्तु रङ्गम् अप्रविष्टोऽपि शौरिः कंसप्रभृतीनाम् अन्येषां सम्भाषणतः एव स्वलीलाः प्रकटयन् स्वीयं नायकत्वं परोक्षतया प्रदर्शयति ।

इदम्प्रथमतया कृष्णस्य दर्शनं यदा करोति तदा कंसेन दृष्टं बाह्यं रूपमिदम् - 'वाचा धिया च परिमातुमशक्यमेतत् लावण्यपूर्णमुरुसुन्दरमस्य रूपम् ।'

शौरिः यद्यपि श्रीमन्नारायणस्य अवतारभूतः, तथापि सः आत्मानं तथा न मन्यते । मातुलं कंसं दृष्ट्वा सः तं भक्तिभावेन प्रणन्तु यतते । सर्वदा विनोदपूर्णः स्वभावः तस्य । अत एव सः स्वप्रणामं निरोद्धु प्रयत्नं कृतवन्तं कंसं वदति - 'भोः मातुलवर, केषाञ्चित् अनभिज्ञानां मन्महत्त्वारोपणतत्पराणां कल्पनावाचि प्रतारितः एवं सामान्यमानुषं मां वृथा अन्यथा अमन्यथाः' इति ।

स्वदर्शनमात्रेण एव दुष्टस्य अपि कंसस्य मनःपरिवर्तनं यथा स्यात् तथा करोति कृष्णः । परिवृत्तमनाः अपि कंसः आयुधपूजामहोत्सवे भागं ग्रहीतुं यदा कृष्णमामन्त्रयति तदा सबलरामः कृष्णः तत्र गच्छति । कुब्जां दिव्यरूपदानेन अनुगृह्णाति । रजकं मारयति । ततः कंसभवनं प्रविश्य आयुधपूजां करोति । पश्चात् कुवलयापीडनामकं गजं चाणूर-मुष्टिकौ च मारयति । अन्ते च कंसेन सह मल्लयुद्धं कृत्वा मुष्टिप्रहारैः तं संहरति ।

स्वजननीजनकयोः देवकीवसुदेवयोः विषये कृष्णस्य महती भक्तिः । अतः एव कंसवधसमनन्तरमेव अविलम्बेन सः कारालयस्य समीपमागत्य तयोः निगडबन्धनं दूरीकरोति । पितरौ प्रणमति च ।

एवं सर्वाण्यपि महाकार्याणि साधितवानपि भगवान् शौरिः आत्मानं तु महापुरुषं न

अपि तु अक्रूरं वदति यत् 'अस्मल्लीलानाटके भवतः पात्रमेव प्रधानमिति
ाः तादृशमपि कंसम् अस्मद्भक्ताग्रेसरम् अकरोः' इति । एतेन भगवतः शौरेः
धिक्यं ज्ञातं भवति । एवं च चतुर्थ–पञ्चमाङ्कयोः एव दृश्यमानोऽपि शौरिः
पे नाटकस्य नायकत्वं निस्संशयं भजते ।

ककारेण जग्गुशिङ्गरार्येण सृष्टः कंसः भागवतकथान्तर्गतात् कंसात् न तथा
तथापि कंसस्य गुणस्वभावादिषु किञ्चिदिव भेदः दृश्यते अत्र ।
कस्यास्य प्रतिनायकभूतः अयं कंसः नितरां कोपशीलः । प्रतिपक्षजनस्तुतिमपि
ाहते । कोपवशात् चिन्तावशात् च सः कदाचित् पुरतः दृश्यमानमपि स्थानम्
तुं न शक्नोति । पूर्वं स्वेनैव चिन्तितमपि कार्यं पश्चात् न स्मरति । यथा – प्रथमाङ्के
नृत्यं द्रष्टव्यमिति निश्चयं कृत्वा, ते च सूचयित्वा तदर्थं क्रीडोद्यानं गत्वा तत्र
कारणमेव विस्मरति ।
ात् नितरां भीतः कंसः तस्य वधाय चतुरङ्गबलसहितं सैन्यं प्रेषयितुमिच्छति ।
चिवानां वचस्यपि आदरः आसीत् तस्य अन्तरङ्गे । अत एव सः सचिवस्य
यं मानयन् सैन्यप्रेषणात् विरमति । कृष्णस्य मारणोपायत्वेन जातमात्रान् बहून्
मारितवान् यत् तद्विषयेऽपि कंसस्य मनसि पश्चात्तापः अस्ति । अतः पुनरपि
न्तुं सः नेच्छति । सचिवस्य सूचनामनुसृत्य सः पूतनां कृष्णस्य मारणे नियोजयति ।
ीये अङ्के कंसस्य यत्पात्रं दृश्यते तत् किञ्चिदिव कामुकत्वपूर्णस्य जनस्य
वस्तुतः शरीरेण स्वस्थोऽपि कंसः कृष्णभयात् मानसिकेन अस्वास्थ्येन पीडितः ।
ासि उल्लासोत्पादनाय सचिवाः मदिरोत्सवं व्यवस्थापयन्ति । 'किमपि अपूर्वं
इति नाम्ना ते महाराजाय मधु ददति । तत्पानेन कंसः मत्तः भवति । मदिरापानेन
तृप्यति कंसः । नर्तकीः आहूय 'नृत्यं कुरुत' इत्याज्ञापयति । परन्तु ताभिः
नृत्येन सः न तृप्यति । 'दास्याः पुत्र्यः... ! किमेवं नृत्यं कुरुथ.. ! उत्प्लुत्योत्प्लुत्य
इति वदन् सः औचित्यप्रज्ञामपि विहाय नर्तकीं चुम्बितुं यतते । तासु सर्वासु
लायितासु 'सर्वे पलायिताः' इति वदति । ततश्च 'नहि नहि, अहमेव पलायितः'
ायन् अन्ते श्रान्तो भूत्वा तत्रैव शयितः निद्रावशः भवति ।
षु गच्छत्सु कंसस्य दुश्चेष्टितानि इतोऽपि अधिकानि भवन्ति । सः अन्तःपुरं प्रविश्य
ासु सर्वास्वपि महिलासु अतिक्रमं कर्तुं प्रयतते । ललनाजनलीलाविलासलोलः
दरीजनसंसर्गसौख्यादन्यत् सुखं किमु ?' इति भावयति ।

संवाहयाब्जमुखि मे चरणौ लताङ्गि
त्वं वीजय व्यजनतः परिचुम्ब सुभ्रु ।
गन्धं विलेपय सखि त्वमिहास्य पार्श्वे
रम्भोरु देहि मधु मां सुपरिष्वजस्व ॥'

– इति कथयतः कंसस्य कामुकत्वं रमणीजनलोलुपत्वं च परां काष्ठां प्राप्नोति अत्र । अत एव सः प्रविष्टं नारदमहर्षिमपि नाभिजानाति । 'कामान्धः लोकं न पश्यति' इत्यस्य आभाणकस्य सार्थकतां सम्पादयति सः स्वकीयेन व्यवहारेण ।

परन्तु तादृशोऽपि कंसः सचिवस्य हितवचनश्रवणानन्तरम् झटित्येव स्वव्यवहारं परिवर्तयति । नारदेन सह सविनयं व्यवहरति । तामसगुणं विहाय प्रशान्तमूर्तिः भवति । कुशलप्रश्नानन्तरं सः नारदं 'स्वशत्रोः शौरेः विनाशाय उपायं सूचयतु' इति प्रार्थयते ।

अक्रूरस्य चिन्तनानुसारं कंसः गूढचराणां प्रत्यक्षानुभवोक्तौ अपि न विश्वसिति । अतः सः कृष्णेन कृतानि सर्वाण्यपि कार्याणि 'भूतचेष्टाः' इति मन्यते । तस्याशयोऽस्ति यत् 'शौरिः न केवलं चोरः अपि तु जारः । तेन अबाधिता गोपस्त्री कापि नास्ति गोकुले । शौरेः शौर्यं नारीभिः एव स्तोतुं योग्यम् ।' एवं निश्चित्य कंसः कृष्णस्य मारणाय चण्डदण्डादीन् पञ्च सेनापतीन् नियोजयति ।

श्रीकृष्णेन कृतं गोवर्धनोद्धारणं श्रुत्वा सः चिन्तापरः भवति । 'नारदेन उक्तं सर्वं तथ्यमेव स्यात्' इति इदानीं चिन्तयति । तथापि गोकुलवृत्तं सर्वं प्रत्यक्षमेव अवलोकयितुम् इच्छन् घोषयात्राव्याजेन तत्र गच्छति । भागवतकथान्तर्गतात् कंसात् एतस्य कंसस्य अयमेव भेदः यत् एषः स्वयमेव गोकुलं गत्वा तत्रैव कृष्णं पश्यति । तद्दर्शनेन प्रभावितः भवति । स्वकीयं वैरबुद्धिं च त्यजति । कृष्णं प्रणमति, तमेव शरणं गच्छति । आयुध-पूजामहोत्सवे भागं ग्रहीतुं कृष्णं मथुरां निमन्त्रयति च । 'दासस्य मम मन्दिरं भवच्चरण-पङ्कजरजसा पवित्रीकर्तुमर्हति' इत्येवं विनयमपि दर्शयति सः । कंसस्य एतादृशं विनय-शीलत्वम् अत्रैव दृश्यते ।

कृष्णदर्शनमात्रेण कंसस्य स्वभावः एव परिवृत्तः इत्येतत् अक्रूरस्य वचनात् ज्ञायते । अक्रूरः नन्दगोपं वदति – 'दुष्टभावेन तव तनयं (शौरिं) विनाशयितुं वृन्दावनप्रदेशं प्रविष्टः सः कंसः बालकृष्णस्य अद्भुततेजःपुञ्जेन अन्धीकृतनयनः नारदोपदेशसूक्तिं मम हितवचनं च विचिन्त्य प्रत्यक्षमपि शौरिमहिमानम् अनुभूय परिवृत्तनिजस्वभावः बभूव । ततः शौरौ मात्सर्यं वैरं च विमुच्य भक्तिभारावनम्रः श्रीकृष्णस्य कृपया सात्त्विक-स्वभावः परिशुद्धान्तःकरणश्च बभूव ।'

रेवृत्तस्वभावः कंसः मथुरामागतं कृष्णं स्वागतेन अर्चति । कृष्णबलरामाभ्यां ायुधपूजां निर्वर्तयति । (भागवतस्य कंसस्य व्यवहारे तु कृष्णविषये एतादृशी ापि न दृश्यते ।) ततश्च कृष्णं वदति – 'भवतः शौर्यं प्रत्यक्षं द्रष्टव्यमित्येव डेन मुष्टिकचाणूराभ्यां सह मया युद्धं व्यवस्थापितम्' इति । कृष्णः युध्यति । मरणानन्तरं कंसः स्वयं कृष्णध्यानपरः भवति ।

ाकटे कठिनं श्रितवत्सु मृदु स्वरिपुष्वपि तत्फणिमूर्ध्नि दृढम् ।
कमलाकरयोर्मृदुलान्मृदुलं मम चेतसि तत्पदमस्तु हरेः ॥

ध्यात्वा तेन सह युद्धं करोति । अन्ते च तस्य मुष्टिप्रहारेण निहतो भवति । शौरिशौर्यस्य प्रतिनायकः कंसः भागवतस्य कंसः इव न केवलं दुष्टः क्रूरः महान् भक्तः अपि । नाटककारेण कंसस्य एतादृशं पात्रनिर्माणं यत् कृतमस्ति लं सहृदयानाम् अन्तरङ्गे स्थास्यति ।

मर्शः

राणे श्रीमद्भागवते च स्थितां श्रीकृष्णस्य कथामेव आश्रित्य लिखितमेतत् ' नाम नाटकम् । नाटकमिदम् अनेकेषु अंशेषु भासविरचितस्य बालचरितस्य । यद्यपि प्रसिद्धकथाधारितमेव एतत् तथापि अस्मिन् नाटके नाटककारेण ञ्चित् परिवर्तनमपि कृतमस्ति । तच्च परिवर्तनं नाटकस्य शोभामेव वर्धयति न वक्तुं शक्यते ।

ङ्के सूत्रधारेण मङ्गलाचरणत्वेन पठितं –

हुगुणितदैत्यदानवरक्षोबलपीडिते जगति ।
ाधुत्राणाय हरिर्योऽजनि रिपुसूदनः स नः पायात् ॥

श्रुत्वा कुपितः कंसः 'आः ! कोऽयं मूढधीरेवं जल्पति ? अहो ! प्रधूमितं लम् अनालोचितस्वविनाशशङ्कः को वा प्रज्वालयितुमिच्छति ?

ायि तिष्ठति सर्वशत्रुहन्तर्यखिलस्वाश्रितलोकरक्षके च ।
ातिपक्षजनस्तुतौ प्रवृत्तो बत कोऽस्त्यस्तसमस्तभागधेयः ॥'

वदति । सूत्रधारे गतवति एतानि एव वाक्यानि पुनरुच्चारयन् प्रविशति कंसः । कंसस्य एषः प्रवेशक्रमः वेणीसंहारनाटकस्य प्रथमाङ्के भीमसेनस्य प्रवेशमेव तत्र यथा भीमः स्वेन प्रविष्टमपि पाञ्चाल्याः अन्तःशालकं नाभिजानाति पे कंसः पुरतः स्थितं प्रदेशमपि नाभिजानाति । परन्तु तत्र कारणं भीमस्य तु कंसस्य कृष्णविषयकं भयम् इत्येषः एव भेदः ।

द्वितीयस्य अङ्कस्य आरम्भे शुद्धविष्कम्भकः प्रयुक्तः अस्ति नाटककारेण। तत्र राजकुलवैद्यस्य अन्तःपुरस्य प्रधानचेट्याः सोमलतायाश्च सम्भाषणद्वारा कंसस्य मानसिकव्याधेः विषयः सूचितो भवति। एतस्मिन् अङ्के नाटककारः नृत्यप्रसङ्गं परिकल्प्य तदन्ते च कामुकस्य कंसस्य नर्तक्याः आलिङ्गनोद्यमरूपमनुचितं व्यवहारं प्रदर्शयति। तस्मात् भीताः सर्वाः नर्तक्यः यदा पलायिताः भवन्ति, पुष्करकाञ्चुकेयौ अपि पलायितौ भवतः, तदा कंसेन कथ्यमानानि वचनानि अत्यन्तम् अर्थपूर्णानि –

'आस्सर्वाः पलायितास्सर्वाः पलायिताः। भो पुष्कर ! भो काञ्चुकेय ! अहो ! तावपि पलायितौ। नहि नहि – अहं पलायितः, अहमेव पलायितः, पलायितः !' (इति स्तम्भमालम्ब्य तिष्ठति)

अत्र मदिरामत्तस्य विस्मृतसमुदाचारस्य कंसस्य आन्तरङ्गिकः पराजयः (तदेव स्वस्य पलायनम्) स्फुटतया ध्वन्यते।

यद्यपि अत्र नाटककारेण रङ्गे एव मदिरापानस्य शयनस्य च सन्निवेशः कल्पितः अस्ति। तस्य नाटकलक्षणविरुद्धत्वात् सः कथम् औचित्यम् आवहतीति प्रश्नः उत्पद्येत, तथापि प्रतिनायकभूतस्य कंसस्य आन्तरङ्गिकतुमुलप्रदर्शनायैव तस्य निबन्धनत्वात् सः रसपरिपोषमेव करोतीत्यतः नास्ति अनौचित्यमिति अवगन्तव्यम्।

नाटकस्य सारतमः भागः अस्ति चतुर्थोऽङ्कः। अत्र च आरम्भे अक्रूरेण क्रियमाणं भगवतः शौरेः लीलाकृत्यानां वर्णनं , ततः कंसेन कृष्णलीलानां भूतचेष्टात्वेन वर्णनम्– इत्येतत् द्वयं 'दृष्टिभेदे सति दृश्यभेदः कथं भवति' इत्यस्य सुन्दरम् उदाहरणमस्ति।

ततश्च अक्रूरस्य वचसा प्रभावितः कंसः घोषयात्राव्याजेन नन्दव्रजमेव गत्वा तत्र शौरिं पश्यति यत्, शौरिणा सह वदति यत्, व्यवहरति च यत् – एतत्सर्वमपि नाटककारस्य कल्पनाविलासस्य प्रतिभाविलासस्य च प्रमाणभूतम्। दुष्टं कंसं कृष्णभक्तत्वेन परिणमयन् शिङ्गरार्यः अत्र कथायाः नूतनं रूपमेव दत्तवानस्ति।

अनार्द्रमार्द्रं त्वरसं रसाढ्यं अपल्लवं पल्लवितं विभाति।
गावो बहुक्षीरदुघा इदानीं शौरौ स्वयं नन्दकुलं प्रविष्टे ॥

इत्येतत् शौरेः प्रवेशकारणतः गोकुलस्य परिसरे सञ्जातं परिवर्तनं रमणीयतया विवृणोति। कृष्णदर्शनानन्तरमक्रूरेण सह प्रस्थितोऽपि कंसः तद्दर्शनविच्छित्तिमसहमानः, परावृत्य तिष्ठन्, पुनःपुनः कृष्णमेव पश्यन् अक्रूरमुद्दिश्य – 'सखे अक्रूर ! इतः प्रयास्यन् कथमस्य भगवतः दर्शनसौख्यलाभात् आत्मानं वञ्चयामि ! तस्य सौन्दर्यलहरी मां पुनःपुनः समाकर्षति स्वसन्निधानम्' इति कथयति यत् तत् नितरां रमणीयमेव।

अङ्के तावत् नाटककारः अक्रूरनन्दगोपयोः सम्भाषणद्वारा एव कंसवध-
ां निरूपयति । तत्र परिवृत्तमानसस्य कंसस्य निर्णयस्तु अत्यन्तं मनोज्ञः एव ।
दति –

क्रूर मे शृणु सुनिश्चितमद्य शौरिं सम्पूज्य वीररसरूपनवार्चनेन ।
त्वा नियुद्धममुना सह साहसेन तत्पाणिपद्मनिहतोऽहमुपैमि मोक्षम् ॥

त्य एव कंसः सर्वं व्यवहारं करोति । कृष्णबलरामाभ्यां सह एव आयुधपूजां
ततः कृष्णेन सह मल्लयुद्धं कृत्वा तत्पाणिभ्यामेव निहतो भवति ।
ः, हास्यः, करुणः अद्भुतश्चेति रसाः नाटकेऽस्मिन् यद्यपि स्थानमलङ्कुर्वन्ति
र्वेऽपि कृष्णविषयिणि भक्तिभावे अङ्गत्वं प्राप्नुवन्ति ।
स्य विदुषः वरददेशिकाचार्यरङ्गप्रियस्य (रङ्गप्रियस्वामिनां) मतानुसारेण
' जग्गु शिङ्गरार्यस्य कृतिषु एव सर्वोत्कृष्टम् । तदीयानि वाक्यानि एतानि –
i Sauryam" - is a masterpiece among the plays of Vidwan
gararya who is a gem among modern Sanskrit poets. Having
e subject material of Krishna's exploits in boyhood from
'urana and Bhagavata, the poet has remodelled it with a
rkable innovations and produced a work of power and
hich can stand comparison with the best of plyas on the
ch as tha Balacharitam of the master-poet Bhasa.

य अङ्कस्य अपि विमर्शं कृत्वा नाटकस्य वैशिष्ट्यं सः बहु सम्यक्
स्ति स्वकीये प्राक्कथने । तत्रापि चतुर्थाङ्कविषये सः विशेषतया लिखति –
th Act of the play as in Shakuntalam is surpassing here
rtrays most effectively the wonderful transformation of a
my of Gods into a devotee of the highest rank. The tyrant
the exploits of boy Krishna as the doings of devil pos-
im and condemns him as the personification of mischief.
ngenious and sainty official Akrura manages to take him
o the presence of the Lord at Gokula and becomes his
er. Kamsa's enemical eyes are dazzled by the brilliance of
f Suns", but lo ! within a moment the fiend in him is totally
t and he is bathed in the coolest showers of the grace and
the Lord. The very sight of the Lord conquers his heart

and soul and the physical conquest is only secondary and we thank the poet for effecting this change in the original story. It only heightens the power of the Lord in our estimation. "What is the good of slaying a wicked person physically without destroying the wickedness in him ?" This innovation of the poet is also in accordance with the spirit of the scriptures which consider Kamsa as the bodily form of wickedness "Kali Kamsah sa bhupatih" and in their view killing of Kamsa is tantamount to killing wickedness itself. The outpourings of Kamsa's heart on this occasion are excellent specimens of devotional lyrics. He begs forgiveness of the Lord and extends to him an invitation to grace his house on the occasion of 'Ayudha Pooja' and the Lord concedes to this devout prayer. As described by Akrura to Nanda in the Fifth and Final Act, Kamsa the great devotee, worships the Lord in his assembly with the unique flower of "Dainyasaahasa-bhakti" and attains permanent bliss. Thus the good offices of Gurus in the form of Narada and Akrura transform a veritable enemy of Gods into a peerless devotee by the magical touch of the genius of the poet who is himself a great devotee surrendering his poetic gift as an offering at the feet of the Lord. Vasudeva and Devaki are freed from physical fetters and Kamsa is freed from the fetters of ignorance and may all beings be freed from all miseries by the grace of the Lord.

The style of the poet is exceedingly simple and lucid and free from the over-loading of figures. The Second Act of the play brings home to us the poet's sensitiveness to the subtleties of music. His formations of new proverbs and phrases have enriched our language and literature. In characterisation also he is at his best. All the characters have their individuality. Let alone the all conquering hero, who completely captivates our hearts, even the villain gains our sympathy in the beginning and our reverence in the end. The innovations of the poet come not as a revolt against the original story, but as a development of it in the field of devotion. The sentiments like Karuna, Sringara and Adbhuta merge in the divine Ganga of Bhakti which joins the ocean of Ananda. The plot of the play is sacred and sweet

-worked out theme of Spiritual Conquest and the imed by the play are most valuable.

this great work of Art which is replete with sweet-he votaries of literature and the aspirants of Bhakti.

र्ण नाटकेऽस्मिन् प्रयुक्ता भाषा अत्यन्तं सरला सुन्दरी च । पद्ये सा स्वकीयं सौन्दर्यं न त्यजति । कुत्रचित् भाषा यद्यपि किञ्चित् अर्थावगमने तु क्लेशो न भवति । वैद्येन क्रियमाणा आत्मप्रशंसा

क्षि-रदन-श्रवणोरु-
ाण-शीर्ष-हृदयादिषु बाधाम् ।
-मुखरोगजपीडां
न्तुमत्र भिषगेव समर्थः ॥ -(*द्वितीयाङ्के*)

ूर्वार्धे सुदीर्घं समस्तपदं प्रयुक्तम्, तथापि प्रसिद्धानां शब्दानामेव : तत् पठने अर्थबोधे वा क्लेशं न जनयति ।

गीतनृत्ययोरपि समीचीनः परिचयः आसीत् । नृत्यप्रसङ्गे त्रमिदम् -

झणरणितं धिं तकतकधिमिति कृतपदन्यासम् ।
भिनयं किं भ्रमयति यतिमपि न नवं नृत्यम् ॥

-(*द्वितीयाङ्के*)

कृतोऽस्ति शब्दविन्यासोऽपि ।

ऽपि मम सामर्थ्यमस्ति' इति ज्ञापयितुमिव शिङ्गरार्यः तत्र तत्र वानस्ति । यथा -

ार्य एव स्तुवन्तु स्थैर्यं धैर्यं कार्यमार्यैर्भवद्भिः ।
केचिदाचक्षतेऽस्मान् वाचैवेतैस्सूच्यते स्वोच्चतेति ॥

-(*चतुर्थाङ्के*)

नमिदम् । अत्र रेफसंवलितस्य यकारस्य ('र्य'-इत्यस्य) नैकवारं त्तरार्धे तु चकारस्य प्रयोगः नैकवारं कृतः अस्ति ।

त्रचित् सम्भाषणेऽपि नाटककारः तादृशं प्रयोगं करोति । यथा-

'आखण्डलस्तु चण्डतरः तद्गोपमण्डलस्य गर्वं खण्डयितुं भयङ्करमहावृष्ट्या अखण्डं गोपनिवासं विनाशयितुमारभत ।' – (चतुर्थाङ्के)

गोवर्धनोद्धारं वर्णयतः अक्रूरस्य वचनमिदम् । अत्र डकारस्य पौनःपुन्येन प्रयोगः कृतः दृश्यते ।

एवं च 'शौरिशौर्य'नाटकमिदं शिङ्गरार्यविरचितेषु नाटकेषु सर्वोत्कृष्टं सत् विराजते । वस्तुदृष्ट्या, नाटकसंविधानदृष्ट्या, पात्रचित्रणदृष्ट्या, नाटकलक्षणान्तर्गतिदृष्ट्या, भाषाप्रयोगदृष्ट्या वा परिशील्यमाने सत्यपि नाटकमिदं प्राचीनैः उत्तमैः नाटकैः सह स्पर्धते इव भासते ।

2. यक्षप्रश्ननाटकम्

सप्तपृष्ठात्मकम् अतीव लघुनाटकमेतत् यक्षप्रश्ननामकम् । महाभारतात् यक्षप्रश्न–प्रसङ्गं स्वीकृत्य तदेवात्र नाटकरूपेण निबद्धमस्ति । यक्षप्रश्नस्य कथाभागस्तु नितरां प्रसिद्धः । महाभारतस्य वनपर्वणः अन्तिमभागे 312, 313, 314, 315तमेषु अध्यायेषु एषः कथाभागः अस्ति । यद्यपि तत्र एषः भागः विस्तृतरूपेणास्ति तथापि तस्य महान् संक्षेपः कृतोऽस्ति । किञ्चिन्मात्रेण परिवर्तनमपि कृतमस्ति । तद्यथा –

1. महाभारते जलान्वेषणार्थं प्रथमं नकुलं प्रेषयति युधिष्ठिरः । यदा सः न प्रत्यागच्छति तदा सहदेवं प्रेषयति । अत्र तु नकुलसहदेवौ उभावपि सहैव गच्छतः ।

2. महाभारते जलाशयं गताः सर्वेऽपि भ्रातरः यक्षवाक्यमनादृत्य जलं पिबन्ति । जलपानानन्तरं निपतन्ति । अत्र जलस्पर्शमात्रेण ते निपतन्ति । पानप्रसङ्गः एव न भवति ।

3. महाभारते अर्जुनः यदा यक्षस्य वचनानि शृणोति तदा क्रुद्धो भूत्वा स्वकीयं पराक्रमं प्रदर्शयितुम् इच्छति ।

वारितस्त्वब्रवीत् पार्थो दृश्यमानो निवारय ।
यावद् बाणैर्विनिर्भिन्नः पुनरेवं वदिष्यसि ॥

इति वदन् अनुमन्त्रितैः शरैः सर्वाः दिशः पूरयति । तथापि किमपि प्रयोजनं न भवति । जलं पीत्वा सोऽपि निपतति । अस्मिन् नाटके तु अर्जुनस्य शरप्रयोगप्रसङ्गः नास्ति ।

4. महाभारते यक्षः प्रथमम् 'अहं शैवलमत्स्यभक्षः बकः' इति वदति । अनन्तरं च युधिष्ठिरेण पृष्टः सन् 'अहं यक्षः अस्मि, नास्मि जलेचरः पक्षी' इति वदति । अत्र तु तादृशं सम्भाषणं नास्ति ।

5. महाभारते सर्वेषां भ्रातृणां जीवनदानानन्तरं धर्मराजः यक्षं 'को भवान् ?' इति

। तदा यक्षः ‘अहं ते जनकः’ इति वदति । अनन्तरं ‘वरं वृणीष्व राजेन्द्र दाता
वानघ’ इति वदति । युधिष्ठिरः ‘यस्य विप्रस्य अरणी मृगेण हृता, तस्य अग्नयः
न्’ इति प्रथमं वरं याचते । ततः ‘अज्ञातवासावसरे केऽपि अस्मान् नाभिजानीयुः’
ीयं वरं याचते । ‘लोभमोहौ क्रोधं च अहं सदा जयेयम् । मम मनः दाने तपसि
सततं यथा भवेत् तथा वरं ददातु’ इति च प्रार्थयते । धर्मस्तु ‘भवान् स्वभावेनैव
ः उपेतः अस्ति । तथापि वरमपि ददामि’ इति तमनुगृह्णाति ।
मेन् नाटके तु धर्मराजः स्वयं वरं न याचते । धर्मः स्वयमेव धर्मराजं वरदानेन
ति । तत्रापि ‘अज्ञातवासनियमपालनावसरे मदनुग्रहात् न कोऽपि अभिजानाति
तवेषान् भवतः सर्वान्’ इति स्वयमेव उक्त्वा सः धर्मराजाय अरणिमपि ददाति ।
महाभारते प्रश्नोत्तरानन्तरं यक्षप्रसादेन सर्वेऽपि भ्रातरः उत्तिष्ठन्ति । ततः वरदान-
भवति । ततश्च धर्मः तिरोहितः भवति ।
तु प्रश्नोत्तरस्यानन्तरं ‘भ्रातरः सर्वेऽपि जीवन्तु’ इति उक्त्वा यक्षः तिरोहितो
ततः भ्रातरः उत्तिष्ठन्ति । अथ च शृङ्गान्तर्लग्नारणिः हरिणः पुनः प्रविशति ।
ौ तं प्रहर्तुमुद्युक्तौ भवतः । परन्तु वैवस्वतमहिम्ना स्तब्धबाहू सन्तौ लज्जया
ष्ठतः । तदा ‘भ्रातरौ ! हरिणं कुतो न प्रहरथः ?’ इति धर्मराजः तयोः उपहासं
तौ लज्जामनुभवतः । तदा हरिणरूपधरः विवस्वान् तत् रूपं परित्यज्य स्वस्वरूपं
। तन्नाम हरिणस्य पुनःप्रवेशप्रसङ्गः महाभारते नास्ति, अत्रास्ति इति विशेषः ।
च प्रसिद्धेऽपि कथावस्तुनि कांश्चित् भागान् विहाय, पुनः कांश्चित् नूतनान्
संयोज्य शिङ्गरार्यः अत्यन्तं संक्षिप्तरूपेण यक्षप्रश्ननाटकमिदं ग्रथितवानस्ति ।
भारते यक्षयुधिष्ठिरयोः प्रश्नोत्तरं यदस्ति तदत्र शिङ्गरार्यः सरलतया निरूपितवान्
तदुभयमपि अत्र तुलनात्मकदृष्ट्या परिशील्यते -
महाभारते -

उवाच - किंस्विद्गुरुतरं भूमेः किंस्विदुच्चतरं च खात् ।
किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात् ॥61॥
ष्ठिर उवाच - माता गुरुतरा भूमेः खात्पितोच्चतरस्तथा ।
मनः शीघ्रितरं वातात् चिन्ता बहुतरी तृणात् ॥62॥

श्ननाटके -

- भूमेरपि महद्वस्तु किम् ? अन्तरिक्षादुत्तुङ्गतरं किम् ? वायोरपि वेगवान्

धर्मराजः – भो देवपुरुष, श्रूयताम् ।

मासान् दशोद्वा जठरेऽथ सूते या सा हि माता महती धरायाम् ।
यो जन्मदाता स पितोन्नतः खात् मनो हि वायोरपि वेगगामि ॥

महाभारते एकस्मिन् श्लोके ये चत्वारः प्रश्नाः सन्ति, तेषु त्रीन् प्रश्नान् पृच्छति अत्रत्यः यक्षः । महाभारते एकस्मिन् श्लोके चत्वारि उत्तराणि निहितानि सन्ति । अत्र तु नाटककारः अन्येन छन्दसा नूतनमेव श्लोकं विरचय्य तत्र त्रयाणामपि प्रश्नानाम् उत्तराणि ग्रथितवानस्ति । श्लोके मातुः पितुश्च यत् विशेषणं प्रयुक्तमस्ति तदपि नितरां श्लाघ्यमेव ।

2. महाभारते –

यक्ष उवाच – को मोदते किमाश्चर्यं कः पन्थाः का च वार्तिका ।
वद मे चतुरः प्रश्नन् मृता जीवन्तु बान्धवा : ॥116॥

युधिष्ठिर उवाच – पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे ।
अनृणी चाप्रवासी च स वारिचर मोदते ॥117॥
अहन्यहनि भूतानि गच्छन्तीह यमालयम् ।
शेषास्थावरमिच्छन्ति किमाश्चर्यमतःपरम् ॥118॥

एतेषां संक्षेपः यक्षप्रश्ननाटके एवं कृतः अस्ति –

यक्षः – जगति सुखी पुरुषः कः ?

युधिष्ठिरः – पञ्चमेऽहनि षष्ठे वा शाकं पचति यो नरः ।
अनृणोह्यपरप्रेष्यः स रात्रिंचर मोदते ॥

यक्षः – जगति आश्चर्यकरं किम् ?

धर्मराजः – अहन्यहनि भूतानि गच्छन्तीह यमालयम् ।
शेषास्थावरमिच्छन्ति किमाश्चर्यमतःपरम् ॥

अत्र तु नाटककारेण किञ्चिदपि परिवर्तनं न कृतम् । श्लोकस्यास्य सारल्यं मनसि निधाय तत् तथैव रक्षितं स्यात् इति भासते ।

एवं च अत्यन्तं लघु एतत् यक्षप्रश्नामकं नाटकं महाभारतान्तर्गतस्य यक्षयुधिष्ठिर–संवादस्य सारं गर्भीकुर्वत् विराजते । शालासु विद्यालयेषु वा नाटकरूपेण छात्रैः अभिनेतुं योग्यमेतत् ।

3. धर्मव्याधदर्शनम्

शिङ्गरार्यविरचितम् अपरं नाटकमस्ति ‘धर्मव्याधदर्शनम् ’। यद्यपि एतदपि लघु

एव, तथापि यक्षप्रश्ननाटकात् बृहत्तरम्। आकारेण नवपृष्ठात्मकम्। अत्रापि नाटककारेण कथावस्तु महाभारतात् एव स्वीकृतमस्ति।

कथासारः

गर्विष्ठेन तपस्विना कौशिकेन क्रोधाग्निना खगस्य दाहनम्, ततः भिक्षार्थं गतेन तेन भिक्षादाने विलम्बमाचरितवत्याः गृहिण्याः गर्हणम्, 'किं मां वनगतं विहगं मन्यसे ? तः मामपि कोपोज्ज्वलदृष्ट्या विलोकसे ?' इति तस्याः वचनं श्रुत्वा तेन तस्याः ातिव्रत्यमाहात्म्यम् अवगत्य क्षमायाचनम्, तस्याः गृहिण्याः प्रेरणया एव ब्रह्मतत्त्व-जिज्ञासया मिथिलां गत्वा धर्मव्याधस्य दर्शनम्, ततः तत्त्वज्ञानप्राप्तिः – इत्येषा कथा सुप्रसिद्धा एव।

पात्रचित्रणम्

वस्तुतः नाटकेऽस्मिन् कौशिकः, गृहिणी धर्मव्याधश्च इति त्रीण्येव पात्राणि प्रधानानि सन्ति। शिङ्गरार्येण तेषां त्रयाणामपि पात्रचित्रणं सम्यक् कृतमस्ति। गर्विष्ठस्य कौशिकस्य, पातिव्रत्यपरायणायाः गृहिण्याः, मांसविक्रयणं कुर्वतोऽपि मातापितृ-क्तस्य धर्मव्याध्यस्य चापि पात्राणि सुचारुतया निबद्धानि सन्ति।

नाटकविमर्शः

महाभारते वनपर्वणि 206तः 216पर्यन्तेषु अध्यायेषु व्याप्तां कथामत्र संक्षिप्तरीत्या नाटकरूपेण ग्रथितवानस्ति शिङ्गरार्यः।

मूलकथायाः अत्र केचन भेदाः सन्ति। यथा –

1. महाभारते स्वेन दग्धां बलाकां दृष्ट्वा कौशिकः कारुण्यात् अभिसन्तप्तः भवति। अहं अकार्यं कृतवान्' इति सः पश्चात्तापम् अनुभवति।

बलाकां पतितां दृष्ट्वा गतसत्त्वामचेतनाम् ॥5॥
कारुण्यादभिसन्तप्तः पर्यशोचत तां द्विजः।
अकार्यं कृतवानस्मि रोषरागबलात्कृतः ॥6॥ – *(महाभारते)*

अत्र तु 'पक्षिदाहः' स्वेन कृतं महत्कार्यं मन्यते कौशिकः।

('अहो ! किमेतत् ? ब्रह्मचर्यनियमपरिशुद्धचेतसो मे वेदाध्ययनव्रतसिद्धिमात्रादेव क्रोधः अपराधिनि विहगेऽस्मिन्नेवं फलितः। एवं सति इतोऽपि तपस्सिद्धिशुद्धहृदयानां निवराणां किं वा दुष्करं भवति ?')

2. महाभारते भिक्षार्थम् आगतं कौशिकं दृष्ट्वा गृहिणी 'तिष्ठ' इत्युक्त्वा पात्राणि

प्रक्षालयितुं गच्छति । तदा तत्र आगतस्य पत्युः शुश्रूषायां मग्ना सा अतिथिं न स्मरति एव । तन्मध्ये च कदाचित् तत्रैव स्थितं कौशिकं दृष्ट्वा, स्मृत्वा च व्रीडिता सती भिक्षाम् आदाय तस्मै ददाति ।

> देहीति याचमानोऽसौ तिष्ठेत्युक्तः स्त्रिया ततः ॥8॥
> शौचं तु यावत् कुरुते भाजनस्य कुटुम्बिनी ।
> एतस्मिन्नन्तरे राजन् क्षुधासम्पीडितो भृशम् ॥9॥
> भर्ता प्रविष्टः सहसा तस्या भरतसत्तम ।
> सा तु दृष्ट्वा पतिं साध्वी ब्राह्मणं व्यवहाय तम् ॥10॥
> पाद्यमाचमनीयं वै ददौ भर्तुस्तथासनम् ।
> प्रह्वा पर्यचरच्चापि भर्तारमसितेक्षणा ॥11॥
> सा ब्राह्मणं तदा दृष्ट्वा संस्थितं भैक्ष्यकाङ्क्षिणम् ।
> कुर्वती पतिशुश्रूषां संस्माराथ शुभेक्षणा ॥16॥
> व्रीडिता साभवत् साध्वी तदा भरतसत्तम ।
> भिक्षामादाय विप्राय निर्जगाम यशस्विनी ॥17॥ –*(महाभारते)*

अत्र तु आगतं कौशिकं ज्ञात्वा 'प्रक्षालितमषीमलिनहस्ता अहमियमागच्छामि । तावत्प्रतिपालयतु पूज्यतमोऽतिथिवरः' इति वदति । तावता एव तस्याः पतिः प्रविशति । तस्य शुश्रूषायां सा यदा मग्ना भवति तदा कौशिकः एव 'भवति ! भिक्षां देहि' इति वदति । तदा गृहिणी तत्रागत्य भिक्षामर्पयन्ती विलम्बाय क्षमां याचते । (गृहाणेदानीं भिक्षाम् । क्षन्तव्योऽयं कालातिपातापराधः ।) तन्नाम विस्मरणस्य, तन्निमित्तकस्य व्रीडानुभवस्य वा चित्रणं नाटके नास्ति ।

3. महाभारते यदा कौशिकः गृहिणीं 'भवती ब्राह्मणानवमन्यते । ब्राह्मणाः कुपिताः चेत् ते पृथिवीमपि दग्धुमर्हन्ति' इति वदति –

> गृहस्थधर्मे वर्तन्ती ब्राह्मणानवमन्यसे ॥21॥
> इन्द्रोऽप्येषां प्रणमते किं पुनर्मानवा भुवि ।
> अवलिप्ते न जानीषे वृद्धानां न श्रुतं त्वया ॥22॥
> ब्राह्मणा ह्यग्निसदृशा दहेयुः पृथिवीमपि ॥ –*(महाभारते)*

तदा गृहिणी 'नाहं बलाका' इति वदन्ती 'विप्राणां विषये मम गौरवमस्त्येव । यतः ते देवतुल्याः' इत्युक्त्वा 'को नाम ब्राह्मणः' इति विस्तरेण वर्णयति । ततश्च 'अहं चिन्तयामि यत् भवान् धर्मस्य यथार्थस्वरूपं न जानाति । यदि भवान् तत् ज्ञातुमिच्छति

तर्हि धर्मव्याधं पृच्छ' इति स्वयमेव तं सूचयति ।

अत्र तु न तथा ब्राह्मणलक्षणविवरणमस्ति । अन्यच्च अत्र कौशिकः स्वयमेव तां 'भवती एव ममाचार्या भूत्वा धर्ममुपदिशतु' इति प्रार्थयते । तदा तु गृहिणी 'भवान् धर्मव्याधस्य समीपं गच्छतु' इति सूचयति ।

एवं च मूलात् केचन भेदाः यद्यपि अत्र दृश्यन्ते, तथापि कथायाः नाटकत्वसम्पादनाय कृतानि तानि परिवर्तनानि इति वयं ज्ञातुं शक्नुमः । नाटकेऽस्मिन् श्लोकाः अधिकतया न प्रयुक्ताः । सम्भाषणरूपेणैव अधिकं निबद्धमस्ति । तत्र तत्र ग्रथिताः श्लोकास्तु अत्यन्तम् अर्थपूर्णाः, हृद्याश्च सन्ति ।

धर्मव्याधः यत्र आसीत् तस्य सूनागारस्य चित्रमिदम् –

अस्थिग्रन्थिं भषकनिचयः खण्डयत्यत्र दन्तैः
गृध्राः काकाः पिशितशकलप्राप्तयेऽमी डयन्ते ।
क्रन्दन्त्युच्चैर्हनननिहिताः प्राणिनो दीनदीनाः
रक्तस्रोतः प्रवहति घनीभूय मन्दं क्रमेण ॥ – *(पृष्ठसंख्या 45)*

सूनागारस्य बीभत्सं चित्रं साक्षात् अस्माकं मनोभित्तौ प्रतिष्ठापयति एतत् वर्णनम् ।

धर्मव्याधेन क्रियमाणः धर्मोपदेशः महाभारते सुदीर्घः अस्ति । तस्य सारतमं भागं स्वीकृत्य अल्पैः एव वाक्यैः तं सुचारुतया निरूपितवान् अस्ति शिङ्गरार्यः अत्र । तस्य उदाहरणम् एतत् –

'महर्षयोऽपि धर्ममर्मचर्चावसरे मुह्यन्ति । क्वचिद्धर्मोऽप्यधर्मो भवति क्वचिदधर्मोऽपि धर्मो भवति । धर्मतत्त्वव्यवस्था नाम अति गहना । सर्वेषामपि जनानाम् अहिंसा परमो धर्मः । तथापि शबरस्य मे मांसविक्रयव्यापारो नैवाधर्मः । यतस्स्वहस्तेनैव अहं प्राणिनो न हन्मि, परैर्हतान् विक्रीणामि । अतो मे न दोषः । यतः –

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥

एवं हि शास्त्रवचनम् – ब्राह्मणानामार्जवं सत्यं दया शान्तिः वेदाध्ययनं शास्त्रविहितकर्मानुष्ठानं दैवभक्तिः मनस्तृप्तिः यजनयाजनादिकर्मनिष्ठा इत्यादयः विशेषतः प्रधानभूताः । भवांस्तु महात्मा पूर्वोक्तसकलनियमपरायणोऽपि प्रत्यक्षदैवतं पितरावुपेक्षते । तदेव ते धर्मभ्रंशः । तदेव ते महत्पापम् ।'

यक्षप्रश्ननाटकमिव एतदपि नाटकं संक्षिप्तं, सरलं, सुखाभिनययोग्यं च सत् विराजते । एतादृशानां नाटकानां लेखने शिङ्गरार्यस्य महत् सामर्थ्यम् आसीत् इति एतेन अस्माभिः

ज्ञातं भवति ।

शिङ्गरार्येण लिखितम् अपरं नाटकं 'शिबिवैभवम्' । परन्तु तत् न मुद्रितम् । प्रकृतं नोपलभ्यते अपि ।

आ. चम्पूकाव्यम्

श्रीयदुशैलचम्पूः

कविना शिङ्गरार्येण विरचितमद्वितीयं चम्पूकाव्यमस्ति 'श्रीयदुशैलचम्पूः ।' 'गद्यपद्यमयी चम्पूः' इति उक्तलक्षणमनुसृत्य गद्यपद्ययोः मनोहरेण सम्मेलनेन काव्यमिदं निबद्धमस्ति । अध्यायानां नाम अत्र 'प्रपञ्च'शब्देन निर्दिष्टमस्ति । स्वजन्मस्थानस्य यदुशैलापरनामधेयस्य मेलुकोटेनामकस्य क्षेत्रस्य पौराणिकमैतिहासिकं च पृष्ठभूमिं विवरीतुं कविना काव्यमिदं रचितमस्ति । षट्सु प्रपञ्चेषु सा च तेन सम्यक् विवृतास्ति ।

कथासारः

प्रथमः प्रपञ्चः

कवेः आराध्यदेवस्य भगवतः श्रीमन्नारायणस्य स्तुत्या काव्यस्य आरम्भो भवति । ततः कविः अन्येन श्लोकेन यतिपतिं रामानुजं स्तौति । ततश्च कथाभागः प्रारभ्यते ।

कदाचित् सर्वेऽपि महर्षयः निर्विघ्नेन तपश्चरणाय कलिकलितश्रमापहं किमपि उत्तमं स्थानमन्विष्यन्तः भ्रमन्तः कुत्रचित् सूतमुनिं दृष्टवन्तः । 'अप्राप्तकलिप्रवेशं स्थानं किम् ?' इति तमेवापृच्छन् । सूतमुनिः 'यदुगिरिरेव तादृशं स्थानम्' इति वदति । 'नारायणेनाध्युषितं चिरेण नारायणाद्रिं यदुमाहरन्ति' इत्युक्त्वा सः पर्वतः 'निजोदरे निर्मितनित्यवासं दामोदरं दूरात् दर्शयतीव विराजते । भवन्तः तत्र गच्छन्तु' इति सूचयति ।

पूर्वं कदाचित् राक्षसपीडिताः देवाः गोरूपधरया धरित्र्या सह क्षीरसागरं गत्वा भगवन्तं महाविष्णुं प्रार्थितवन्तः । नारायणस्तु 'अहं वसुदेवस्य पुत्रो भूत्वा वसुधायाः भारं हरामि' इति तान् सान्त्वयामास । अनन्तरं मथुरायां देवक्याः अष्टमगर्भात् श्रीकृष्णरूपेण जन्म प्राप्तवान् । पूतना-शकट-कंस-नरकादीन् सर्वानपि राक्षसान् हत्वा भूभारहरणं कृतवान् ।

अनन्तरकाले जरासन्धस्य मारणार्थं समुचितं कालं प्रतीक्षमाणः श्रीकृष्णः मथुरां परित्यज्य सर्वैः सह निर्जगाम । ततः निवासार्थं योग्यस्य स्थानस्यान्वेषणं कुर्वन्तः ते सर्वे सह्याद्रेः दिशि गोमन्तपर्वतमागताः । तत्पार्श्वे स्थितं करवीरपुरं प्राप्तवन्तः । तदा तत्र

सृगालवासुदेवः दुष्टः शास्ति स्म । कृष्णः तममारयत् । करवीरपुरमत्यन्तं सुन्दरं नगरम् । तत् सौन्दर्यं दृष्ट्वा कृष्णबलरामौ नितरामाकृष्टौ । अतः तौ युवतिजनेन सार्धं तत्रैव वासं कृतवन्तौ । कस्यचित् कालस्य अनन्तरं पुनः तौ गोमन्तपर्वतमेव गत्वा तत्र निवासं कृतवन्तौ । सः पर्वतः एव यदुशैलनाम्ना प्रसिद्धोऽभवत् ।

द्वितीयः प्रपञ्चः

देवैः विज्ञापितः शौनकमुनिः यदुशैलचरितं वक्तुमारभते । सृष्टेः पूर्वं समग्रापि जगती तमसावृता आसीत् । तदा श्रीमन्नारायणस्य नाभिकमलात् ब्रह्मा जातः । नारायणः तं प्रणवं श्रुतीश्च बोधयामास । ततः ब्रह्मा जगन्ति ससर्ज । कदाचित् ब्रह्मा दक्षादिभिः पुत्रैः परिवृतः सन् नारायणं प्रार्थयामास 'अस्माकमर्चनाय भवान् कृपया स्वमूर्तिं ददातु' इति । नारायणः निजाकृतिं तस्मै प्रादात् । सन्तुष्टः विधाता विमानेन तां नारायणाकृतिं सत्यलोकमानीय तत्र सनकसनन्दनादिभिः पुत्रैः सह अनेकानि युगानि यावत् तस्याः आराधनमकरोत् । अथ कदाचित् सनत्कुमारः पितरं प्रार्थयामास 'तां नारायणाकृतिं मह्यं ददातु' इति । ब्रह्मा दत्तवान् । आदिष्टवान् च 'एतत् विष्णुविमानं यदुपर्वते निवेश्य, स्थापयित्वा एतस्य अर्चनं करोतु' इति । सनत्कुमारः दक्षिणदिशम् आगत्य तत्र यदुशैलस्य उपरिभागे विमानं संस्थाप्य फाल्गुनपूर्णिमायां पाञ्चरात्रविधिना हरिमाराधयामास ।

ततः हरिविमानस्य अनतिदूरे एव किमपि तीर्थं दृष्ट्वा तत् वराहरूपिणः भगवतः विष्णोः अङ्गादेव समुत्पन्नम्, अतः गङ्गायाः अपि बहुगुणमिति निश्चित्य कल्याणी इति तस्य नाम अकरोत् । विष्णुपूजनतत्परः सः तत्रैव चिरमुवास ।

अत्रान्तरे सुचरितो नाम कश्चिद्विप्रः पत्न्या पुत्राभ्यां च सह तीर्थयात्रार्थं प्रस्थितवान् । गोकर्ण-श्रीरङ्गादीनि अनेकानि पुण्यक्षेत्राणि गत्वापि सः केनापि हेतुना यादवाद्रिं न गतवान् । एवं पर्यटन् सः कदाचित् गङ्गानदीं गतः । परन्तु सः यादवाद्रिं तत्रत्यां कल्याणीं त्रा न गतः इत्यतः कुपिता गङ्गा आत्मानं न प्रदर्शितवती । तदनु किमर्थमेवं सञ्जातमिति बहुधा चिन्तयन् सुचरितः गङ्गामेव भक्त्याध्यायत । गङ्गा सन्तुष्टा सती निजस्वरूपं प्रदर्शितवती । अनन्तरं स्वकीयं स्रवन्तीरूपमपि दर्शितवती । तदाज्ञाम् अनुसृत्य सुचरितः गङ्गायां स्नात्वा ततः यादवाद्रिमागत्य तत्रैव चिरं वासमकरोत् ।

तत्र सुचरितस्य तृतीयः पुत्रः नारायणः जातः । अथ कदाचित् तत्प्रदेशे सर्वत्रापि महानवग्रहः सञ्जातः । सुचरितः महत् कष्टमनुभूतवान् । ततः सः भार्यायाः सुशीलायाः वचनेन द्रविडेश्वरस्य दर्शनाय प्रस्थितः । महता कष्टेन द्रविडदेशं प्राप्य द्रविडपतेः दर्शनम्

अकरोत् । ततः धनमपि प्राप्नोत् । परन्तु ततः प्रतिनिवर्तनावसरे मार्गे चोराः ततः सर्वमपि धनं वशीकृतवन्तः । नष्टधनः श्रमार्तश्च सन् सुचरितः कथमपि स्वगृहं प्राप्नोत् ।

अत्रान्तरे नारायणः बुभुक्षया पीडितः सन् भिक्षामयाचत । तन्माता कथमपि किञ्चित् अन्नं सम्पाद्य पुत्राय दत्तवती । सोऽपि तत् दृष्ट्वा ‘अम्ब ! भगवते अनिवेदितमन्नं कथं खादानि ?’ इत्यपृच्छत् । सुशीला ‘त्वमेव भगवते अन्नं निवेदय’ इत्यवदत् । नारायणः भगवतः सदनं गत्वा पात्रं देवस्य पुरतः संस्थाप्य ‘नारायण ! इदं स्वीकरोतु’ इति भक्त्या प्रार्थितवान् । श्रीशोऽपि बालभक्त्या सन्तुष्टः सन् निश्शेषं तदन्नमखादत् । नारायणः मातुः समीपमागत्य ‘अम्ब ! अन्नं ददातु’ इति प्रार्थयामास । माता आश्चर्येण ‘पूर्वं दत्तं कुत्र ?’ इति पृष्टवती । पुत्रस्तु ‘देवः खादितवान्’ इत्यवादीत् । तस्य वचने अविश्वस्य सा माता कोपेन ‘भिक्षामटन् जीव’ इति तं तर्जयित्वा हस्ते भिक्षापात्रं दत्तवती ।

नारायणः पात्रं गृहीत्वा गृहं गृहं गतः । सः यद्यद्गृहं गतवान् तत्र तत्र भगवती लक्ष्मीः तस्य भिक्षापात्रं रत्नभिक्षया पूरितवती । गृहमागत्य नारायणः पात्रं मात्रे दत्तवान् । माता विस्मिता सती पुनरपि तं भिक्षार्थं प्रेषितवती । एवं नारायणः सप्तवारं भिक्षाटनं कृत्वा रत्नान्यानीतवान् । अष्टमे पर्याये तु लक्ष्मीः दिव्यभोज्यैः तस्य पात्रं पूरितवती । सुचरितोऽपि पत्नीमुखात् प्रवृत्तं सर्वं विज्ञाय पुत्रं भूरि प्रशस्य देवब्राह्मणपूजनादिभिः तत् धनं व्ययीकुर्वन् आनन्देन कालं यापितवान् ।

अथ कदाचित् तस्य विप्रवरस्य धनम् अपहर्तुं केचन चोराः विप्रवेषेण तत्रागताः । सुचरितः तान् स्वगृहम् आहूय आतिथ्यं कृतवान् । यद्यपि ते चोराः, तथापि सुचरितस्य प्रभावेण, भगवतः महिम्ना च तेषां मनःपरिवर्तनं जातम् । ते सुचरितं नमस्कृत्य स्वमानसोद्देशं निवेद्य तं क्षमां प्रार्थितवन्तः। अन्ते सुचरितोपदेशात् ज्ञानं सम्पाद्य परां निर्वृतिं प्राप्तवन्तः ।

तृतीयः प्रपञ्चः

शौनकमहर्षिः पुनरपि वदति । श्रीरामचन्द्रः अरण्यवाससन्दर्भे सञ्चरन् कदाचित् यादवाद्रिमागतवान् । पर्वतोपरि स्थितं भगवन्तं नारायणं सः लक्ष्मणेनानीतैः कमलपुष्पैः पूजयामास । कांश्चन मासान् यावत् तत्रैव न्युषितवान् च । ततः वनवासं समाप्य, राक्षसान् निहत्य अयोध्यां जगाम । श्रीरामस्य अभिषेकार्थमयोध्यामागतवतः विभीषणस्य निवर्तनसमये रामः तस्मै स्वेन प्रतिदिनं पूज्यमानं रङ्गनाथविग्रहं दत्तवान् । विभीषणः तं लङ्कामनयत् । परन्तु अनन्तरं धीरोऽपि रामः परदैवतस्य विरहेण विषादमनुभूतवान् ।

तदा ब्रह्मा 'यादवाद्रौ पूर्वं भवता यो देवोऽर्चितः तस्य अंशजमेनं मुकुन्दं नित्यं सेवताम्' इत्युक्त्वा तं विग्रहं रामाय दत्तवान्। श्रीरामः अनेकानि वर्षाणि यावत् तं देवमाराधितवान्। अनन्तरं आञ्जनेयाय तं विग्रहं दत्तवान्। आञ्जनेयः तं कालान्तरे रामपुत्राय कुशाय दत्तवान्। कुशस्य पुत्री कनकमालिनी पितरं सम्प्रार्थ्य, ततः तं प्राप्य, यदुशैलमागत्य तत्र तं पूजितवती। द्वापरे युगे कृष्णबलरामावपि तं पूजितवन्तौ। एवं सः विग्रहः भगवतः नारायणस्य रामावतारस्य कृष्णावतारस्य च लीलां द्रष्टुमिव तत्र स्थितः आसीत्।

अत्रान्तरे राक्षसराजस्य बलेः पिता विरोचनः कदाचित् योगनिद्रावशङ्गतस्य विष्णोः किरीटमपहृतवान्। विष्णोः परिचारकाः तदन्वेषणाय वैनतेयं प्रार्थितवन्तः। वैनतेयः सर्वत्र अन्वेषणं कृत्वापि तं न प्राप्तवान्। अन्ते च भूम्याः अधः निलीनं तं दैत्यं दृष्टवान्। वैनतेय-विरोचनयोः युद्धं प्रवृत्तम्। तत्र क्षतितः विरोचनः किरीटं परित्यज्य पलायत। वैनतेयः मुकुटं गृहीत्वा भूलोकमार्गेण क्षीरसागरं प्रति प्रस्थितः। गमनसमये वृन्दावने विहरन्तं श्रीकृष्णं सः ददर्श। किरीटं श्रीकृष्णाय समर्पितवान् च। कृष्णोऽपि स्वेन पूज्यमानस्य भगवतः रामप्रियविग्रहस्य मौलिदेशे तत् किरीटं समर्पितवान्। अनन्तरं क्षीरसागरं गत्वा सर्वमपि वृत्तान्तं भगवन्तं विष्णुं निवेदितवान्। विष्णुः वैनतेयं 'भवान् प्रतिवर्षमपि रामप्रियाय तत् किरीटं धारयित्वा दिव्योत्सवमाचरतु' इत्यादिशत्। बलराम-कृष्णौ यात्राप्रसङ्गेन यदा दक्षिणदिशं प्रति गतवन्तौ तदा रामप्रियं महता उत्सवेन नारायणाद्रिं नीतवन्तौ। एवं तत्र भगवान् प्रतिष्ठापितोऽभवत्।

चतुर्थः प्रपञ्चः

पुनरपि शौनकः कथां वदति। पूर्वं चतुर्वेदी इति नामकः कश्चन राजपुरोहितः आसीत्। कदाचित् सः गृहे पितृकर्म कर्तुमिच्छन् विप्रान् निमन्त्रितवान्। तदा कश्चन वृद्धः तत्रागत्य तं 'भवतः ख्यातिं श्रुत्वा अहमत्र आगतः, दूरात् यदुशैलशृङ्गात्। मम नाम हरिरातः। एषः मम पुत्रः। अस्मै खादितु किमपि ददातु' इति प्रार्थयत। 'मम गृहे अद्य पितृकर्म। अतः किमपि न लभ्यते' इति चतुर्वेदी उवाच। 'तण्डुलान् वा ददातु' इति विप्रः पुनः प्रार्थितवान्। चतुर्वेदी तं परुषाक्षरैः निन्दित्वा तौ बहिः निस्सार्य द्वारस्य कवाटबन्धनम् अकरोत्। चतुर्वेदिना प्रणुन्नः बालकः भूमौ पतितः क्षतितश्च। सः 'त्वं प्रणश्य' इति शप्तवान्। बालमुत्थाप्य वृद्धः तं समाश्वास्य चण्डातपे एव ततः प्रस्थितः।

मार्गमध्ये मिलितः विष्णुरातनामकः विप्रः तौ स्वगृहमनयत्। गृहे विष्णुरातः स्वपत्नीम् उक्तवान् – 'अद्य उञ्छवृत्तौ यल्लब्धमस्ति तत्सर्वं पच' इति। सापि पाकमारभत।

अत्रान्तरे कश्चित् यतीन्द्रः चतुर्भिः शिष्यैः सह तत्रागतः । विष्णुरातः तान् सर्वानपि प्रथमं भोजयामास । तावता पक्वं सर्वमपि समाप्तम् । विष्णुरातस्य पुत्रस्य कृतेऽपि किञ्चिदपि नावशिष्टम् । सः बालः आहारनिमित्तं मातरं पीडितवान् । सा च साध्वी 'अहो सर्वमपि समाप्तं खलु' इति पतिमवदत् । विष्णुरातः 'सम्यक् पश्य । पात्रे किञ्चित् स्यात्' इत्युवाच । सा पाकशालां गत्वा पश्यति तत्र सर्वमपि पात्रं यथापूर्वं पूरितमस्ति ! विस्मिता सा आनन्देन पतिं पुत्रं च भोजयित्वा स्वयमपि भोजनं कृतवती । तदनन्तरं तस्मिन् गृहे प्रतिदिनमपि पात्राणि तथैव स्वयमेव पूर्णानि भवन्ति स्म ।

अत्रान्तरे चतुर्वेदिनः गृहे श्राद्धनिमित्तं विप्राः उपस्थिताः । तत्र संस्थापिते क्षीरे कश्चन सर्पः विषं समुद्गीर्णवान् । तद् अज्ञात्वा क्षीरं पीत्वा विप्राः मृताः । तेन कारणेन राजा भटानां द्वारा चतुर्वेदिनं निगृहीतवान् । चतुर्वेदी तत्परिवारजनाश्च राजभयात् मृताः । तान् सर्वान् यमदूताः नरकलोकं नीतवन्तः । तत्र घोरं नरकं दृष्ट्वा चतुर्वेदी भीतः । अन्ते सः यमधर्मं दृष्ट्वा तमपृच्छत् – 'प्रभो ! अहं षडङ्गान् वेदान् अधीतवान् । धर्माचरणं च कृतवान् । अतिथिपूजामपि कृतवान् । एवं सत्यपि अस्मान् भवान् किमर्थं बाधते ?' इति । यमधर्मराजस्तु 'भवान् ब्राह्मणे दुराचारं कृतवान् । बुभुक्षितं तत्पुत्रं निष्करुणतया गृहात् बहिः निस्सारितवान् । भवता कृतानां पापानां फलम् अनुभोक्तुं शतं जन्मानि अपि न पर्याप्तानि । अतः भवान् विन्ध्यपर्वतस्य अटवीषु ब्रह्मराक्षसो भूत्वा अटतु । विष्णुभक्तकटाक्षपातः यावत् भवति न भवति तावत् तत्रैव तिष्ठतु । भवदनुयायिनोऽपि राक्षसाः भवन्तु' इति । तदनुगुणं ते सर्वेऽपि राक्षसाः सन्तः जन्म प्राप्तवन्तः ।

अत्रान्तरे कौचित् विप्रवरौ यदुशैलं गत्वाप्रतिनिवर्तमानौ मार्गे विन्ध्यारण्यं प्राप्य तत्र विष्णोः गुणकथनं कुर्वन्तौ विश्रान्तिसुखमनुभूतवन्तौ । तदा तत्रागतः ब्रह्मराक्षसः विष्णुनामसङ्कीर्तनं श्रुत्वा जन्मान्तरस्य स्मृतिं प्राप्तवान् । तौ नमस्कृत्य स्ववृत्तान्तं निवेदितवान् । विप्रौ तं 'यदुशैलाधिपतेः प्रदक्षिणकीर्तनादिकं कृत्वा शापमुक्तो भविष्यसि' इत्यवदताम् । ब्रह्मराक्षसः स्वबान्धवैः सह यदुगिरिं गत्वा तत्र वासमकरोत् । तत्र भक्त्या यदुनाथस्य सपर्यां कृत्वा इह परत्र च सुखमन्वभूत् ।

पञ्चमः प्रपञ्चः

कदाचित् शाक्यप्रभृतयः अन्यथाव्याख्यानेन वेदार्थं मलिनीकृतवन्तः । तदा वेदप्रार्थनया भगवान् नारायणः दत्तात्रेयरूपेण भुवमवतीर्य, स्वकीयं तत्त्वं लोके सम्यक् प्रतिष्ठापयामास । शाण्डिल्यनामकः मुनिरपि पाञ्चरात्रागमप्रमाणवाक्यैः परतत्त्वसारं

प्रकाशयामास। एवं बौद्धाः, पाषण्डाः, काणादाः, जैनाः, अन्ये च निरस्ताः। नारायणपरतत्त्वसिद्धान्तः लोके सम्यक् प्रतिष्ठापितोऽभवत्। कदाचित् दत्तात्रेयः शाण्डिल्यश्च स्वशिष्यैः समवेतौ सत्कथाकथनं प्रवर्तितवन्तौ। पराशरोऽपि तत्रागत्य कथाः अशृणोत्। 'हरेः तुलस्याः अपि प्रियतरं नान्यत् किमपि' इति ज्ञापयितुं काचित् कथा तत्र प्रस्तुता।

पूर्वं धर्मकेतुर्नाम राजा बभूव। सः कदाचित् यदुशैलमागतः तत्र सुवर्णपुष्पैः भगवतः पूजां कृत्वा विविधानि भक्ष्याणि तस्मै समर्पितवान्। एवमेव सः नव दिनानि भगवतः अर्चनमकरोत्। रात्रौ आकाशे वार्तालापं कुर्वतोः गन्धर्वयोः मुखात् सः श्रुतवान् यत् 'यदुगिरिपतिः राज्ञा धर्मकेतुना कृतां कनकसुमपूजां विहाय यथालाभनामकेन विप्रेण दूरादेव समर्पितां तुलसीमालां धरतीति चित्रम्' इति। तदा सः संशयेन मन्दिरमागत्य पश्यति, तत्र देवस्य शिरसि तुलसीमालास्ति, स्वेन समर्पितानि सुवर्णपुष्पाणि न सन्ति!

अथ विस्मितः राजा तं विप्रं नत्वा विनयेन 'आर्य! भवान् कथं पूजां कृतवान्?' इति पृष्टवान्। सोऽपि विप्रः तम् एकादशीव्रतफलं तुलसीप्रभावं च उपदिदेश। सन्तुष्टः राजा धर्मकेतुः तुलस्या एव भगवतः पूजां कृत्वा परमं सुखं प्राप्तवान्।

एवं प्रकारेण कथाः कृत्वा दत्तात्रेयादयः ततः यदुशैलसमीपस्थानि तीर्थक्षेत्राणि दृष्ट्वा सर्वेऽपि वयमत्रैव वसामः' इति निश्चित्य तत्र न्यवसन्।

एवं कथाः उक्त्वा नारदः 'वयमपि यदुशैलं गच्छामः' इति उक्त्वा व्यासादिभिः मुनिभिः साकं प्रस्थितः। ते सर्वे यदुशैलमागतवन्तः। तत्र च विराजमानं लावण्यलीलागृहं नारायणमादरेण पुनःपुनः दृष्ट्वापि ते तृप्तिं नावापुः।

षष्ठः प्रपञ्चः

भूतपुरीनामिका काचन नगरी। तत्र केशवो नाम कश्चन विप्रः। तस्य पत्नी कान्तिमती। अनपत्यौ तौ दम्पती पुत्रार्थं तपः कुर्वन्तौ आस्ताम्। आदिशेषः तयोः पुत्रत्वेन जन्म प्राप्तवान्। रामानुजः इति पिता तस्य नाम कृतवान्। रामानुजः यथाकालमुपनीतः, शास्त्रशिक्षितश्च कालान्तरे विवाहितश्चाभवत्।

रामानुजः यादवप्रकाशनामकस्य महापण्डितस्य शिष्यत्वं प्राप्तवान्। परं रामानुजस्य प्रतिभामसहमानः यादवप्रकाशः गङ्गायात्रामिषेण तं मारयितुमैच्छत्। अतः तेन सह यात्रार्थं प्रस्थितश्च। परन्तु मार्गमध्ये रामानुजः तस्याशयं ज्ञात्वा ततः निभृतं प्रस्थाय काञ्चीनगरं प्राप्तवान्। तत्र च शालकूपात् भगवतः निमित्तं पानीयानयनकार्ये निरतः अभवत्। यादवप्रकाशः काञ्ची प्रत्यागतः। सः रामानुजं श्रौतमर्थम् उपदिष्टवान्। पुनः

कदाचित् सः श्रुत्यपार्थम् उक्तवान्। विस्मितः रामानुजः साध्वर्थं विवृतवान्। तेन कुपितः यादवप्रकाशः रामानुजं ततः निष्कासितवान्।

अत्रान्तरे श्रीरङ्गे निवसन् यामुनमुनिः तत्रागन्तुं रामानुजमसूचयत्। परन्तु रामानुजस्य तत्र प्राप्तेः पूर्वमेव सः मृतः। रामानुजः नगरात् बहिरेव तस्य कलेवरमपश्यत्। यामुनमुनेः तिस्रः अङ्गुलयः कुञ्चिताः आसन्। तस्याभिप्रायमवगत्य रामानुजः ताः अङ्गुलीः प्रविमोच्य, श्रीरङ्गमगत्वैव काञ्चीनगरं प्रतिनिवृत्तः। ततश्च सः संन्यासाश्रमं स्वीकृत्य 'यतिराजः' इति बिरुदं प्राप्तवान्। कूरेश–दाशरथीत्यादयः तस्य शिष्याः अभवन्। अविनीतं यादवप्रकाशमपि स्वशिष्यं कृत्वा यतिराजः तं साधुगुणैः विनीतमकरोत्। ततः रामानुजः श्रीरङ्गमागतवान्। तत्र श्रीभाष्यादिमहाग्रन्थान् विरचितवान्। सर्वत्र सञ्चारं च कृतवान्। भगवती शारदा एव तस्मै 'भाष्यकारः' इत्यभिधानं दत्तवती।

यदा रामानुजः आसीत् तदा भूम्यां नास्तिकः अवैष्णवः वा कोऽपि नासीत्। परन्तु चोलेश्वरः तु वैष्णववैरी असीत्। सः रामानुजं तदा तदा पीडयति स्म। अतः रामानुजः भक्तग्रामं गतवान्। तत्र विठ्ठलदेवनामा राजासीत्। सः बहुकालात् बौद्धगुरुमाश्रितवान् आसीत्। राज्ञः पुत्रीं किञ्चित् रक्षः गृहीतवत् आसीत्। रामानुजः पादतीर्थदानेन राजपुत्रीं ग्रहपीडाविमुक्तां कृतवान्। सन्तुष्टः विठ्ठलदेवः रामानुजस्य शिष्यत्वं स्वीकृतवान्। तेन दत्तं 'विष्णुवर्धन' इति नाम प्राप्तवान् च। अनन्तरं रामानुजः कदाचित् यवनिकायाः पृष्ठतः आदिशेषरूपेण स्थित्वा, दश सहस्रं वाददक्षान् बौद्धान् युगपत् जितवान्।

अथ कदाचित् रामानुजस्य निकटे ऊर्ध्वपुण्ड्रधारणार्थमानीता श्वेतमृत् समाप्ता। तदा यदुशैलनाथः एव तं स्वप्नेऽवदत् – 'मां मृत्स्नां च समुद्धर' इति। रामानुजः स्वप्नवृत्तान्तं नृपाय निवेद्य राज्ञा सह यदुशैलं गत्वा, वल्मीकमृत्स्नां विदार्य, तत्र स्थितं नारायणमपश्यत्। मृदपि तत्रैव लब्धा। तया ऊर्ध्वपुण्ड्राणि धृत्वा आनन्देन दिनत्रयं यावत् यतिराजः यदुपतेः अर्चनमकरोत्। अनन्तरं विशालं मन्दिरं कल्पयित्वा तत्र भगवन्तं यदुपतिं प्रतिष्ठापयामास। नारायणपुरनामकम् अतिमनोहरं नगरमपि निर्मापयामास।

उत्सवाचरणार्थं तत्र उत्सवमूर्तिः नासीत्। 'दिल्लीश्वरात् तां समुपानय' इति रामानुजं नारायणः स्वप्ने सूचितवान्। रामानुजः दिल्लीनगरं गतवान्। दिल्ल्यां यवनाधिपतिः शासनं कुर्वन् आसीत्। वस्तुतः श्रीमन्नारायणस्य पत्नी लक्ष्मीः एव यवनाधिपतेः पुत्रीरूपेण जन्म प्राप्तवती आसीत्। अतः भगवान् रामप्रियः तस्याः यवनाधिपपुत्र्याः अन्तःपुरे एवासीत्। तत् ज्ञात्वा रामानुजः अन्तःपुरसमीपं गत्वा 'रामप्रिय ! अत्रागच्छ'

इत्याहूतवान्। रामप्रियः बहिरागत्य अस्य अङ्कमारुह्योपविष्टवान्। अयं तं 'सम्पत्कुमार' इत्याहूतवान् । तत आरभ्य सम्पत्कुमारः यतिराजपुत्रः इत्येव विख्यातोऽभवत् ।

अनन्तरं रामानुजः सम्पत्कुमारं यदुशैलमानेतुमुद्युक्तः । तदा यवनराजपुत्री मोहम् उपगतवती । दिल्लीश्वरः तां सम्पत्कुमारं च रत्नरुचिरं चतुरन्तयानमारोप्य, जामात्रे सम्पत्कुमाराय यथेच्छं यौतुकमपि दत्त्वा तूर्यघोषपुरस्सरं प्रस्थापयामास । तया सह स्वपुत्रं महत् सैन्यं च प्रेषितवान् । यवनसुता यदुगिरिं दृष्ट्वा अतीव सन्तुष्टा । परं सा साक्षात् निजवल्लभेन यदुपतिना एक्यं प्राप्नोत् । जनैश्च अदृश्याभवत् ।

विस्मितः रामानुजः तस्याः यवनसुतायाः कनकमयीं प्रतिमां कारयित्वा तां श्रीशपदान्तरे अभिषिक्तवान् । ततः यदुशैलपतेः उत्सवाचरणं कुर्वन् सुखेन कालमनयत् । यदुशैले मठं कृत्वा तत्र वासं कुर्वन् सः शिष्येभ्यः श्रीभाष्यादीन् ग्रन्थान् बोधयामास ।

द्वादशवर्षाणाम् अनन्तरं रामानुजः श्रीरङ्गक्षेत्रं गन्तुमैच्छत् । परन्तु शिष्याः गुरोः वियोगमनिच्छन्तः शोकाकुलाः जाताः । तदा रामानुजः स्वकीयामर्चाकृतिं कारयित्वा, तत्र शक्तिं निधाय तेभ्यः दत्तवान्। शिष्याः तामेव अर्चाकृतिं पूजयन्तः आनन्देन न्यवसन्। यतिराजेन रामानुजेन प्रेम्णा उद्धृतः सः यदुशैलः यतिशैलः इत्यपि प्रसिद्धो जातः । तत्पश्चात् रामानुजः श्रीरङ्गक्षेत्रं गत्वा तत्र श्रीरङ्गनाथस्य सेवां कुर्वन् सन्तोषेण अतिष्ठत् ।

कृतिविमर्शः

'गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते' इति खलु चम्पूकाव्यस्य लक्षणम् । परन्तु गद्यपद्ययोः मेलनेन केवलं चम्पूकाव्यं न भवति । यतः तत्र रसात्मकत्वमपि अपेक्षितमेव । 'चमत्कृत्य पुनाति सहृदयान् इति चम्पूः' इति वचनमपि अनुसृत्य सहृदयहृदयावर्जकत्वं चमत्कारजनकत्वं च तत्र नितरामावश्यकम् । एवं सत्येव गद्यपद्ययोः मेलनं किमपि रामणीयकं भजते । अतः एव चम्पूरामायणकारः भोजदेवः अपि –

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः ।

इत्यवदत् । कविः शिङ्गरार्यः स्वकृतेः यदुशैलचम्प्वाः विरचनसन्दर्भे एतत्सर्वमपि मनसि निधाय एव सा कुत्रापि नीरसा यथा न भवेत् तथा कर्तुमेव प्रयत्नं कृतवानस्ति । अतः गद्यभागे पद्यभागे वा अलङ्काराणां प्रयोगादिषु विशेषतया सः दत्तावधानः दृश्यते । ग्रन्थारम्भे विज्ञापनायां यथा तेन लिखितं तथा नारदीयादिषु पुराणेषु सुप्रसिद्धं यदुशैलनायकस्य श्रीमन्नारायणस्य इतिवृत्तमनुसृत्य, कालान्तरे रामानुजाचार्यैः कृतं यदुशैलस्य पुनःप्रसिद्धीकरणं च अवलम्ब्य काव्यमिदं विरचितं वर्तते ।

काव्यस्य प्रथमे पद्ये एव श्लेषस्य उपयोगं कुर्वन् कविः विशिष्ट्या रीत्या मङ्गलाचरणं कृतवानस्ति ।

श्रीमन्नारायणोऽस्मिन् विहरति रमया नीळया भूमिदेव्या
यद्वद्रौ शेषभावाच्छ्वशुरमपि रहो वर्तमानं यतीन्द्रम् ।
दृष्ट्वा मन्दाक्षयुक्ताः नतमुखकमलाः पश्यतस्तास्सहर्षं
विष्णोस्तस्यातिरम्या स्थितिरिह भवतु श्रेयसे भूयसे वः ।।

श्रीमन्नारायणः यदुशैले रमया नीलया भूमिदेव्या च सह विहरति । तत्र यतिराजः रामानुजः तस्य शेषभावात् तिष्ठति । शेषभावः इत्यस्य भृत्यभावः इति एकः अर्थः । आदिशेषत्वमिति अपरः अर्थः । भक्तस्य रामानुजस्य भृत्यभावस्तु उचितः एव । स च आदिशेषस्य अवतारभूतः इति अग्रे वर्णितत्वात् आदिशेषभावोऽपि उचितः एव । सोऽयं यतिराजः श्रीमन्नारायणं सम्पत्कुमारं स्वपुत्रं मन्यते । अतः सः तत्पत्नीनां रमादीनां सर्वासां श्वशुरः । श्वशुरस्य सद्भावे स्नुषाणां लज्जावनतमुखत्वं प्रसिद्धमेव । तथापि ताः पतिं सहर्षं पश्यन्ति । विष्णोः तादृशी अतिरम्या स्थितिः भवतां भूयसे श्रेयसे भवतु ।

ततः कविः रामानुजयतीन्द्रं प्रणमति । शेषः आदौ विष्णोः तल्पभूतः आसीत् । रामावतारकाले सः रामानुजः लक्ष्मणोऽभूत् । कृष्णावतारे च कृष्णाग्रजः बलरामः । एतस्मिन् कलियुगे तु भगवतः विष्णोः पितृत्वमेव सः प्राप । (सम्पत्कुमारः तस्य पुत्रः इति प्रसिद्धः) तं यतिपतिमहं वन्दे इति ।

तदनन्तरं च शिङ्गरार्यः स्वकुलं वर्णयति । तस्य पितामहः वृत्तमुक्तावळीनामकं ग्रन्थं विरचितवान् । तस्य नामापि शिङ्गरार्यः एव । तत्पुत्रस्य नारायणस्य पुत्रः अयं ग्रन्थकृत् शिङ्गरार्यः ।

स्वकाव्यविषये सः वदति –

अन्यैरकथितभावैरचुम्बितार्थैर्मनोज्ञपदगुम्फैः ।
काव्यं करोमि यदुगिरिपरिवृढचरिताञ्चितं च तत्कृपया ।।5।।
चमत्कृतिः पुराणानां कवीनां वाचि वर्तते ।
हृद्येयमपि लक्ष्मीशनायकत्वाच्च मत्कृतिः ।।6।।

'अन्यैः अनुक्तैः भावैः, अस्पृष्टैः अर्थैः, मनोज्ञैः पदपुञ्जैश्च अहं यदुगिरिनाथस्य कृपया काव्यमिदं करोमि' इति । यद्यपि चमत्कारस्तु पुरातनकवीनां वचनेष्वेव वर्तते इति सः जानाति, तथापि लक्ष्मीशनायकत्वादेतदपि काव्यं हृद्यमिति तस्य विश्वासः ।

एतावदुक्तवतः कवेः मनसि संशयः भवति यत् मया कृता कविप्रशंसा स्वकाव्यप्रशंसा

वा अपराधाय न भवेत् किम् ?' इति । तदा तु सः एव 'कविसम्प्रदायमनुसृत्य मया एवं लिखितम् । अतः पाठकाः भवन्तः मा कुप्यन्तु' इत्यपि विनयेन प्रार्थयते –

कविप्रशंसा रचिता स्वकाव्येष्वन्यत्र चालोक्यविशेषतोऽद्य ।
मयापि तन्मार्गजुषेयमुक्ता वाणी न कुप्यन्तु ततो विदग्धाः ॥7॥ इति ।

ततश्च कविः गद्यरूपेण कथाभागस्य आरम्भं करोति ।

'मात्स्यपुराणनारदीयपुराणान्तर्गतयोः यादवगिरिमाहात्म्यकथाभागयोः मात्स्यपुराणोक्तयादवगिरिमाहात्म्यं सूतमुनिना उक्तम् । तत्प्रथमप्रपञ्चेऽभिहितम् । नारदीयपुराणान्तर्गतकथा तु नारदेनोक्ता सा कथा द्वितीयप्रपञ्चात् वर्ण्यते । एतत्पुराणद्वयोक्तकथयोरपि श्रोतारं श्रीशौनकमेव द्वितीयप्रपञ्चे कथावक्तारमाकलय्य तन्मुखेन उभयपुराणान्तर्गतकथापि प्रोक्तेति सङ्गतिरत्र कृता । काशीखण्डादिषु प्रोक्तमेतत् पुण्यक्षेत्रमाहात्म्यमपि पञ्चमप्रपञ्चे प्रकटितं वर्तते ।

'अप्राप्तकलिप्रवेशः प्रदेशः कः?' इति ऋषिभिः पृष्टः सूतः 'यदुशैलमेव तादृशं स्थानम्' इति कथयन् तस्य पर्वतस्य वर्णनं कर्तुमारभते । 'नारायणेनाध्युषितं चिरेण नारायणाद्रिं यदुमाहरन्ति ।' इति तदीयं वचनम् अतीव लालित्ययुक्तं दृश्यते ।

यदुशैले भुजङ्गैः आवृताः कालागरुचन्दनद्रुमाः अपि सन्ति । अतः सः दूरादेव स्वस्मिन् विष्णोः वासं दर्शयतीव दृश्यते –

यः पर्वतेन्द्रो भुजगप्रणद्धावलग्नकालागरुचन्दनद्रुः ।
निजोदरे निर्मितनित्यवासं दामोदरं दर्शयतीव दूरात् ॥16॥

ततश्च तस्य शैलस्य यदुशैलमिति नाम कथं प्राप्तमिति सूतः एव वदति । अत्र च चम्पूकारः गद्यमाश्रयते –

पुरा किल निजभुजपराक्रममदनिराकृतनिखिलसुरासुरे सकलजगदुपप्लवैककर्मण्यनिद्राणे रावणे रणे रामेण सदळं विदळितेऽपि कन्दळितेव कालान्तरे दोहदवशाद्विषवल्लरी शिशुपालप्रमुखेन पांसुलजनेन नृशंसावतंसेन कंसेन च संसृष्टा हिंसा संसाररुजेव जगत्त्रयमत्रासयत् ।

कवेः हृद्या गद्यशैली अत्र स्फुटं दृश्यते । गोरूपधरा पृथ्वी भगवन्तं विष्णुं स्वक्लेशं निवेदितवती इत्यस्य वर्णनं कविः इत्थं करोति –

धरापि गोरूपधरा दुरूढां धुरं सुरारातिजनांशभाजाम् ।
निवेदयन्ती निगमार्च्यपुंसे तमाससादाथ समं सुरौघैः ॥22॥

तत् श्रुत्वा भगवान् किञ्चिदिव सञ्चचाल –

मञ्चं कञ्चित्कलशजलधौ कञ्चुकिप्रायमञ्चन्
सिञ्चन् चञ्चन्नळिननयनालोकनैस्सत्प्रपञ्चम् ।
किञ्चित्तेषां नयनसरणौ चञ्चरीकासितांशून्
मुञ्चन् पञ्चायुधपरिवृढैरञ्चितस्सञ्चचाल ॥24॥

उभयत्रापि कविना शब्दालङ्कारः सुचारुतया प्रयुक्तः अस्ति । भगवतः दर्शनं यदा सञ्जातं तदा देवाः सर्वे परवशाः सन्तः स्वकीयं गमनोद्देशमपि निवेदयितुं विस्मृतवन्तः –

अथ निरीक्ष्य तदीयमहामहः परवशास्त्रिदशास्स्वकमाशयम् ।
गदितुमप्यधिशार्ङ्गि विसस्मरुः सदसि भीतियुता इव पण्डिताः ॥28॥

सदसि भीताः पण्डिताः भाषणमेव यथा विस्मरन्ति तथा एतेषां देवानामपि परिस्थितिः आसीदिति कविः चमत्कारितया वर्णितवान् अस्ति । ततश्च भगवतः श्रीकृष्णरूपेण अवतारस्य कथा उच्यते । तत्र च कविः यशोदायाः भाग्यमेवं वर्णयति –

यशोदा भाग्यवत्तायां विजिग्ये देवकीमपि ।
या स्वस्तन्यप्रवृद्धस्य हरेः क्रीडास्समैक्षत ॥35॥

श्रीकृष्णेन कृतं पूतनादीनां राक्षसानां संहारमतीव मनोज्ञया शैल्या कृतवान् अस्ति कविः । तत्र एकैकोऽपि श्लोकः आस्वादनयोग्योऽस्ति । यथा –

भुजगी कुरुते क्षीरं क्ष्वेळं हि परमारकम् ।
विपर्यासादियं क्ष्वेळं क्षीरं कृत्वा स्वयं हता ॥39॥

भुजगी क्षीरमपि विषं कृत्वा अन्यान् मारयति । परन्तु इयं पूतना विषमेव क्षीरं कृत्वा पाययितुमुद्यता, स्वयमेव हताभवत् । सा अहमेकाकिनी यमलोकं कथं गच्छेयमिति खिन्नासीत् । अत एव कृष्णः शकटासुरमपि मारयित्वा तं तत्सहायभूतं कृतवान् –

शकटं निकटङ्गतं स डिम्भो विकटाटोपविजृम्भितोग्रनादम् ।
यमलोकपथे सहायभूतं तमकार्षीदतिखिन्नपूतनायाः ॥40॥

तृणावर्तः नाम राक्षसः एव महागर्तः । तस्य पूर्तये कृष्णः एव महीधरः । वत्सासुरः एव मत्स्यः । तस्य मारणे तु कृष्णः बकः इव व्यवाहरत् –

तृणावर्तमहागर्तपूर्तिकल्यमहीधरः ।
वत्सासुरासुमत्स्याशुभक्षणे बकचेष्टितः ॥41॥

वृषभासुरः एव दुष्टशिला । तस्याः विदलने श्रीकृष्णः वज्रायुधम् । केशिः एव उलूकशावकः । तस्य विषये तु कृष्णः सूर्यकिरणानां विजृम्भणम् इव आसीत् –

वृषभासुरदुर्वर्ष्मदृषदादळने पविः ।
केशिकौशिकशाबस्य दिनेशांशुविजृम्भणम् ॥44॥

चाणूरमुष्टिकादयः राक्षसाः एव वायवः । श्रीकृष्णस्तु तादृशानां वायूनां भक्षकः सर्पः । कंसस्य प्राणाः एव पांसवः । तादृशपांसूनां प्रशमने कृष्णः प्रशस्तः प्रावृडागमः –

चाणूरमुष्टिकादीनां प्राणवायुफणीश्वरः ।
कंसांसुपांसुशमनप्रशस्तप्रावृडागमः ॥46॥

सर्वेषु अपि एतेषु श्लोकेषु रूपकालङ्कारस्य एव विजृम्भणं दृश्यते ।

सर्वशक्तः अपि भगवान् श्रीकृष्णः जरासन्धस्य मारणे तु शक्तः नाभवत् इत्येतत् 'सर्वः सर्वं कर्तुं न प्रभवति' इत्यस्य उदाहरणमिति कविः अभिप्रैति । तस्य उपोद्बलकरूपेण सः श्रीकृष्णस्य मुखादिदं वचनं वाचयति –

पत्नी गङ्गा सूनुरिन्दुः पयोधेस्तौ द्वौ मौळिं शङ्करस्याधिरूढौ ।
पारावारो नारुरोहासमर्थस्सर्वस्सर्वं नैव शक्नोति कर्तुम् ॥54॥

समुद्रस्य पत्नी गङ्गा, पुत्रः चन्द्रः । तौ द्वावपि शङ्करस्य मौलिमारूढवन्तौ । परन्तु समुद्रः स्वयं तथा कर्तुं न शशाक ।

करवीरपुरस्य वर्णनप्रसङ्गे तत्रत्यं सूर्यम् एवं वर्णयति कविः –

स्त्रीणामलक्तरसरञ्जितपादपद्मं संवीक्ष्य तन्मधुररूपहृतस्वचेताः ।
ध्यायंस्तदेव सततं हृदि यत्र सूर्यः ताद्रूप्यमेव भजते बत रक्तपादः ॥64॥

करवीरपुरनिवासिन्यः सुन्दर्यः स्वपादपद्मे अलक्तकरसेन लेपयन्ति । अलक्तक–रसासिक्तं तत्पादपद्मयोः मधुरं रूपं दृष्ट्वा सूर्यः सततं हृदि तदेव ध्यायति । अतः सोऽपि रक्तकिरणः सन् तादृशमेव रूपं धारयति ! हेतूत्प्रेक्षायाः सुन्दरमुदाहरणमेतत् ।

द्वितीये प्रपञ्चे यदुशैलचरितं विस्तृतरूपेण वर्णयति कविः । तत्र कथाश्रवणोत्सुकान् ऋषीनुद्दिश्य नारदः कथां कथयति । तदीयं कथाकथनप्रसङ्गमेवं वर्णयति कविः –

नारदो नीरदस्तोमगम्भीरनिनदेन तान् ।
शिखिनः कर्तुमारेभे शिखिसन्निभवर्चसः ॥11॥

नारदस्य कण्ठध्वनिः मेघस्तोमस्य शब्दः इव गम्भीरः । अत्र कविः मेघशब्दस्य प्रयोगम् अकृत्वा 'नीरद'शब्दस्य प्रयोगं करोति । नारद–नीरदशब्दयोः साहचर्यं कामपि कमनीयतां भजते । मेघनिनादं श्रुत्वा शिखिनः, तन्नाम मयूराः उत्कण्ठाः भवन्ति । तद्वदेतेऽपि शिखिसन्निभवर्चसः, तन्नाम अग्निसदृशतेजस्काः ऋषयोऽपि उत्कण्ठाः सञ्जाताः । अत्र श्लेषवशात् शिखिशब्दस्य अर्थद्वयं निबद्धवानस्ति कविः ।

गद्यस्य प्रयोगे तु कविः शिङ्गरार्यः तत्र तत्र प्राचीनान् गद्यकवीन् अनुकरोति, तेषां शैलीमेव स्मारयति च । तत्र उदाहरणत्वेन गद्यभागमिमं परिशीलयितुं शक्नुमः –

ब्रह्मणा भगवतः विष्णोः अर्चाकृतेः पूजा एवं विहिता –

अथ विविधपटुपटहपणवदुन्दुभिवीणावेणुप्रमुखदिव्यचतुर्विधवाद्यमधुररवानुगतवेदघोषोपबृंहितबृन्दारकवन्दिबृन्दानुसन्धीयमाननानाविधासाधरणनारायणबिरुदगीतिरवस्य च केतनगतसुवर्णसवर्णसुपर्णवपुःप्रभाधारापरम्पराभिरिव मूर्तिमतीभिस्समन्ततस्सञ्चलद्दिव्यकञ्चुकिप्रपञ्चकरचञ्चलकार्तस्वरवेत्रलताभिरभिहतानाविवाभितस्समभिधावतामातपत्राणफणिफणामणिगणकिरणानामपहरणचणायाः नारायणदिव्यविमानसुषमायाश्च सकलदिगन्तप्रथमाक्रमणकदने समुज्जृम्भमाणे स्वयम्भूरयं व्योमयानं नारायणीयमानीय सभक्तिप्रकर्षं दिव्यमहर्षिजनहर्षजयघोषदन्तुरिते सत्यलोके स्थापयित्वा सह सनकसनन्दनसनत्कुमारादिभिः कुमारैर्युगानामयुतं भगवन्तमाराधयामास ।।20।।

'ओजस्समासभूयस्त्वमेतद्गद्यस्य जीवितम्' इति प्राचीनानां साहित्यशास्त्रविदामुक्तिं सार्थवतीं कृतवानस्ति अत्र कविः ।

लोकस्य स्वभावस्य पूर्णः परिचयः शिङ्गरार्यस्यासीत् । तस्य प्रमाणमपि अस्मिन् चम्पूकाव्ये तत्र तत्र उपलभ्यते । पितरं ब्रह्माणमुद्दिश्य सनत्कुमारस्य वचनमिदम् –

बहुपुत्रवानपि पितानुरज्यते समदृष्टिरेव सकलेषु सूनुषु ।
प्रथमात्मजे पुनरयं विशेषतः प्रणयस्स्वभाव इति लोकसम्मतिः ।।25।।

यस्य अनेके पुत्राः भवन्ति सः यद्यपि सर्वेषु पुत्रेषु समदृष्टिरेव भवति, तथापि ज्येष्ठे पुत्रे तस्य प्रणयस्वभावः विशेषतः भवति । एषः तु लोकसम्मतः एव विचारः । लोकस्य स्वभावपरिचयवशादेव कविः एवं लेखितुमर्हति, नान्यथा ।

स्वेन अर्च्यमाणामर्चाकृतिं यदा पुत्रः सनत्कुमारः याचते तदा ब्रह्मणः दुःखं सन्तोषश्च युगपद् भवतः । तदीया स्थितिः तदा एवमासीत् –

इति तनयवचो निशम्य वेधाः हरिविरहेण सुतस्य चापि भक्त्या ।
मनसि स निदधे नितान्तचिन्तां मुदमपि सागरवद्विषं सुधां च ।।30।।

विषम् अमृतं च स्वस्मिन् धृतवतः समुद्रस्य उपमा अत्र कविना सम्यक् विचार्यैव दत्तास्ति । तां च अर्चाकृतिं प्राप्तवतः सनत्कुमारस्य चित्रणमिदं परिशील्यताम् –

निधिमिव निरपायं दुर्विधो दैवयोगात्
अमृतकरमिवेन्दोः काङ्क्षितं वा चकोरः ।

परमथ मुमुदेऽसौ प्राप्य पद्मासहायं
सरसिजभवपुत्रस्सारभूतं श्रुतीनाम् ॥33॥

निर्भाग्यः कश्चन निधिं प्राप्तवानिव, चकोरः चन्द्रमेव प्राप्तवानिव च श्रुतीनां सार-सर्वस्वभूतं तं विष्णुं प्राप्य सः हर्षमन्वभवत् ।

सुचरितस्य कथाप्रसङ्गे तत्पुरतः गङ्गादृश्या जातेत्यस्य वर्णनमेवं करोति कविः –

विष्णोः पदात्सञ्जनितेयमासीत्पुरा श्रुता विष्णुपदीति नाम्ना ।
अदृश्यतामेत्य च तत्पुरोऽद्य गङ्गानदी विष्णुपदीबभूव ॥59॥

गङ्गा विष्णुपदोद्भवा । अतः सा विष्णुपदी इति प्रसिद्धा । इदानीं तु सुचरितस्य पुरतः स्थितापि सा अदृश्या जाता । अतः सा विष्णुपदीबभूव । एतस्य विवरणं कविरेव टिप्पण्यामेवं लिखति – विष्णुपदीबभूव – अविष्णुपदं विष्णुपदं सम्पद्यमानं बभूव – विष्णुपदीबभूव । अकाशमिव अदृश्यासीदित्यर्थः । विशिष्टः प्रयोगः अत्र कृतो दृश्यते ।

कविना निबद्धं सुचरितेन क्रियमाणं गङ्गास्तोत्रं तु उत्तमकाव्यगुणोपेतमस्ति । यथा –

त्रिविक्रमपदोदये त्रिपुरजिज्जटोपाश्रये
समूलहतनारके सगरपुत्रसन्तारिके ।
सरिद्दयितवल्लभे सुदृढपाप्मनां दुर्लभे
प्रकाशय हताशये मयि दयां पयस्स्रोतसा ॥61॥

का वा कुलोद्धृतिकरी भवतीव लोके
भस्मीकृतान् ऋषिरुषा पतितानधोऽधः ।
पाताळतस्समनयश्श्वशुरानशेषान्
नाकाङ्गणं सपदि सागरराजकान्ते ॥62॥

गङ्गे त्वमभ्रमहिता प्रथिताप्यदभ्रं
पूर्वं प्रपूर्णकरुणा धरणीमुपेत्य ।
अस्मादृशां भ्रमवतां हितमाचरन्ती
भ्रान्तं तवापि सविधे किमुपेक्षसे माम् ॥63॥

अत्र अन्तिमः श्लोकः पण्डितराजस्य जगन्नाथस्य गङ्गालहर्याः पद्यमिदं स्मारयति –

तवालम्बादम्ब स्फुरदलघुगर्वेण सहसा
मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः ।

इदानीमौदास्यं यदि भजसि भागीरथि तदा
निराधारः कथय हा! रोदिमि केषामिह पुरः ॥ –

– *(गङ्गालहरी)*

दारिद्र्यस्य वर्णनमपि कविः अतीव चमत्कारितया करोति। आत्मानं पीडयत् दारिद्र्यम् उद्दिश्य विप्रवरस्य सुचरितस्य प्रार्थना एषा –

दारिद्र्य रेफात्मक मामकीनां वाचं शृणु त्वं कृपयाद्य किञ्चित् ।
करोषि मां यत् किल निर्धनाढ्यं तत्रापि रेफं हर मे शुभं स्यात् ॥84॥

त्वं मां निर्धनाढ्यं यत्करोषि तत्रापि रेफं हर। तदा तु अहं निधनाढ्यः भवामि। तन्नाम दारिद्र्यादपि मरणमेव वरमित्याशयः।

एकस्य विषयस्य वर्णने उद्युक्तः कविः तत्सम्बद्धान् बहून् अन्यानपि विषयान् सुचारुतया निबध्नाति। तद्विषये तस्य महत् कौशलमासीदिति अस्य चम्पूकाव्यस्य अवलोकनेन भाति। तत्र इदमुदाहरणम् –

भगवान् श्रीरामः यदुशैलमागतः आसीदिति कथयितुमुद्युक्तः कविः तस्मिन् अवसरे कीदृशः सः श्रीरामः इति विवरीतुमुद्यतः पञ्चभिः श्लोकैः श्रीमद्रामायणस्य सर्वामपि कथां वर्णयति –

यस्योत्पत्त्या रघुकुलमभूत्पावनं यच्छराणाम्
अन्नप्राशस्त्वसुभिरभवत्तादृशस्ताटकायाः ।
विश्वामित्राध्वरपरिसमाप्तिश्च यद्दोः प्रभावात्
पादस्पर्शाद्दृषदपि वने योषिदासीद्यदीयात् ॥2॥
ऐशं चापं जनकशुचमप्याशु भङ्क्त्वोपयेमे
यस्सीतां यो भृगुतनयदोर्दर्पसर्पाण्डजेशः ।
मातुर्वाक्याद्विपिनमविशज्जानकीलक्ष्मणाभ्यां
यो यद्बाणाः खरमुखमहाकोणपप्राणपानाः ॥3॥..... इत्यादयः ।

अत्र 'यस्योत्पत्त्या रघुकुलमभूत् पावनम्' – इत्यादि यच्छब्दवाच्यं रामस्य एकैकमपि विशेषणं रामायणस्य एकैकं प्रसङ्गं ज्ञापयति। एवं च पञ्चभिरेव श्लोकैः समग्रमपि रामायणमत्र वर्णितमस्ति। कवेः महती प्रतिभा अत्र सुव्यक्ता भवति।

काव्यगतस्य सर्वस्यापि पात्रस्य चित्रणे चम्पूकारः महत् कौशलं प्रदर्शयति। तस्य वर्णनशैली तादृशी अस्ति यत् यस्य वर्णनं क्रियते सः जनः काव्यपाठकस्य मनोनेत्रयोः पुरतः एव तिष्ठति। चतुर्थे प्रपञ्चे कविना कृतस्य वृद्धस्य एतत् चित्रणं तत्र प्रमाणम् –

जराविपद्ग्रासमसह्यदुःखं दुर्गन्धजन्मावसथं शरीरम् ।
इच्छामि नैवेति वदन्निवासीत् वयःकृतैश्शीर्षतिरःप्रकम्पैः ॥12॥

सः स्थविरः दण्डस्य आधारेण चलति स्म । तच्च दण्डग्रहणं, दण्डेन मार्गस्य कुट्टनं च किमर्थम् इत्युक्ते 'अहं मार्गदैर्घ्यं सोढुं न शक्नोमि' इत्यस्य कोपस्य प्रदर्शनाय !

सहे न दैर्घ्यं बत वर्त्मनोऽस्य श्रान्तोऽस्मि दूरभ्रमणेन सद्यः ।
इति क्रुधा किं करक्लृप्तयष्ट्या पदे पदे कुट्टयति स्म भूमिम् ॥14॥

अतीव मनोहरं चित्रणमिदम् । शिङ्गरार्येण कृतं नरकस्य वर्णनं तु अत्यद्भुतमेव । गरुडपुराणादिषु नरकस्य यत् वर्णनं कृतं दृश्यते तदेव अत्र सः गद्यरूपेण स्वकीयैः वचनैः एवं कृतवानस्ति –

इत्थमशिशिरकिरणकठोरातपसन्तप्तशितशिलामुखशतदुरवगाहेन पथातीत्य दवीयसीं सरणिं तरङ्गिणीशरीरिणीमनणीयसीं विपदमिव वैतरणीमवगाह्य चादूर एव विदारितोदर–दरीपरिक्षिप्तिमरीचिकाफलक्षोदसन्तापं दुर्वहभरानम्रानःकर्षणत्वरणकशाहन्यमान–जर्जरितकळेवरमायसवायसास्याकृष्यमाणकनीनिकाभागं कराळकाळभुजङ्गदश्यमान–मर्मस्थानं घोरसारमेयदंष्ट्राग्रलूयमानजठरप्रदेशं क्रकचधाराशीर्यमाणशिरोभागं मुसलाहतिभज्यमानभुजदण्डं सीव्यमानाधरोष्ठं निष्पिष्यमाणकण्ठनाळं घृष्यमाणदेहबन्धं प्रज्वालिततैलभाण्ड–पतनावसरभयविदीर्णविवर्णवदनदीनाक्रन्दं प्रतप्तायःपिण्ड–कबळनसमयविरचितविकारचीत्कारं दहनमयनिलयप्रवेशवेळाविजृम्भितहाहारवं विपन्मयं क्लेशप्रायं हिंसाशतं यातनातरङ्गं स्वकर्मानुरूपं पापफलमनुभवन्तं जीवलोकमवलोक्य च बध्यतामयं स्तम्भे छिद्यतामेष रसनायां भज्यतामसावूरुप्रदेशे आरोप्यतामस्य शिरसि शिलाभारः निक्षिप्यतामयमन्धतमसे निपात्यतामयं रौरवे नियोज्यतामसौ कालसूत्रेणेत्यादिभयङ्करकान्तकभटतर्जनगर्जनाक्षराण्याकर्ण्य च इदं परस्वापहर्तुरेतदनृतवदस्य चेदं पाकभेदिन इदमवकीर्णिन इदमनुजीविहिंसकस्येदं शरणागतघातुकस्येदं स्वामिद्रोहिण इदमपहृतपरकळत्रस्येदं सतीवञ्चकस्येदं गुरुद्रोहिण इदं कृतघ्नस्येदं साधुजनहिंसकस्येदं ब्रह्मघ्नस्य चेत्यादिलेखनाक्षराभिज्ञापिततत्तद्दण्ड–स्थानमवबुध्य च सः चतुर्वेदी द्विगुणितभयचञ्चलनयनकरोरुभागः मुहुमुह्यन् मुहुर्विवृण्वन् वदनं तैरेव कालदूतैर्गळहस्तिकया परस्तात्प्रवेशितः सहानुचरैरनतिदूर एव महिषरोमन्थ–फेनिलसमीपभागं मृदुलकम्बलास्तीर्णोन्नतवरासनोपरि कृतोपवेशं पार्श्वगतमसृणशिला–भित्तिप्रत्युप्तदन्तशङ्कुपङ्क्तिविनिहिततीक्ष्णतरविविधायुधजातं चित्रगुप्तपरिपठ्यमान–चेतनापराधपरंपरं विचार्यमाणागःप्रकारं विधीयमानशिक्षाशतं अज्ञाप्रतीक्षणव्यग्रोग्रकृत्य–

भृत्यशताक्रान्ताग्रभागं वल्लवमिव धृतदण्डं जलावतीर्णवनवारणमिव समूलोत्कीर्णपङ्कजातं विहितशिक्षाभेदमपि समवर्तिनं अवाचीदिगीशमपि प्राचीनं जीवितेशमपि परेतपतिं सप्ताश्वजातमपि महिषवाहनं यममप्यद्वितीयं धर्मराजमपश्यत् ॥48॥

नरकस्य बीभत्सं चित्रणमिदं पाठकानां मनसि चिरं तिष्ठति । चतुर्वेदिप्रभृतयः घोराकाराः राक्षसाः सञ्जाताः इति कथयन् कविः राक्षसानां वर्णनमेवं करोति –

कराळमुखकन्दराः पृथुशिताग्रदंष्ट्राङ्कुराः
चलन्नयनकोटराः पृथुलवल्गदोष्ठाधराः ।
क्रमेळकगळोरुकाः बहुळपक्षरात्रिप्रभाः
बभूवुरथ तेऽखिलास्सपदि दारुणाः राक्षसाः ॥67॥

तेष्वपि प्रधानभूतः अयं चतुर्वेदी एवमासीत् तदानीम् –

करोटिभ्यां कृत्वा श्रवणयुगभूषां च करिणः
तथा कृत्या वस्त्रं विदधदुपवीतं च सिरया ।
पिपासाक्षुन्निद्रागदबहुळदुःखान्यनुभवन्
उवासासौ क्रव्वान्निजपरिजनैस्तत्र विपिने ॥68॥
प्रत्यग्रच्छिन्नवन्यद्विपशतविगळद्रक्तधारापिपासा–
व्यावल्गत्पावकार्चिःप्रतिभटरसनालेह्यमानाग्रदंष्ट्रः ।
मस्तिष्कान्त्रास्थिमांसक्षतजविभजनप्राप्तकालातिपातो–
द्भूतक्रोधप्रसर्पद्रदनकटककटात्कारबिभ्यत्स्वदारः ॥69॥

काव्यस्य कस्मिंश्चित् भागे समुद्रवर्णनं प्रस्तुतं भवति । तदानीं तु शिङ्गरार्यः एकस्य मुखात् समुद्रमेवं वर्णयति –

रामश्शामळ एव तस्य हृदयं गम्भीरमेवाभवत्
बाहूदीर्घतरौ च किञ्च नयने चञ्चन्मनोहारिणी ।
इत्युच्चैर्निनदन्निवायमुदधिस्संसूचयत्यादरात्
स्वैरेवाम्बूमहानिवेशविचलत्कल्लोलमीनाधिपैः ॥77॥

श्रीरामः एवमेव श्यामळवर्णः । सः एवमेव गम्भीरः । तस्य बाहू दीर्घौ । तस्य नेत्रे च मनोहारिणी – इत्यादिप्रकारेण समुद्रः उच्चैः रामगुणकीर्तनं करोतीव शब्दं करोति ।

समुद्रे अद्यापि तरङ्गाः किमर्थं सन्ति इति चेत् श्रूयताम् –

पीयूषार्थं मथ्यमाने पयोधौ यास्सञ्जाताः भूरिकल्लोलमालाः ।
तत्संस्काराः नैव शान्तास्तरङ्गाः नोचेदेषां संभवे कोऽस्ति हेतुः ॥78॥

पूर्वं कृतयुगे देवासुरैः समुद्रमथनं कृतं खलु, तदा तत्र मन्थनवशात् अत्यधिकाः कल्लोलमालाः समुत्पन्नाः। तत्संस्कारयुक्ताः तरङ्गाः एव समुद्रे सन्ति इत्यतः अद्यापि ते न शान्ताः। यद्येवं न स्यात् तर्हि समुद्रस्य एवं कल्लोलोत्पत्तेः कारणमेव नास्ति।

समुद्रस्य जलं लवणमस्ति। तत्र कारणमेतदस्ति –

पूर्वं मामपिबन्मुनिः करतलेनैवाम्भसामाकरं
वेशन्तीकृतवान् महान्तमपि मां पद्भ्यां कपिः कश्चन।
गूढं बाडववह्निरप्यतितरामद्यापि मां पीडयत्येवं
शोकजबाष्पशोषिततया क्षारं जलं ते ध्रुवम् ॥82॥

'पूर्वमगस्त्यः करतलेन मामपिबत्। हनूमान् महाकायमपि मां वेशन्तीकृतवान्। मम उदरे स्थितः वाडवाग्निः अद्यापि मां पीडयति इति शोकेन समुद्रः निरन्तरं बाष्पमुत्सृजति। अत एव तदीयं जलं क्षारमस्ति! अहो कविकल्पनाविलासः!

पञ्चमे प्रपञ्चे दत्तात्रेयशाण्डिल्ययोः सत्कथाकथनावसरे कश्चन वृत्तान्तः अस्ति –

पूर्वमरण्ये सञ्चरन् कश्चन वनचरः व्याघ्रं दृष्ट्वा भीतः ततः आत्मनं रक्षितुं कञ्चित् वृक्षमारूढवान्। तदुपरि कश्चन महाकपिः आसीत्। वनचरः तं कपिं शरणमगच्छत्। कपिः तं सान्त्वयित्वा श्रान्तं तं विश्रान्तिसुखमनुभवितुं सूचितवान्। निश्चिन्तः सः वनचरः निद्रामकरोत्। व्याघ्रस्तु वृक्षस्य अधोभागे एव आसीत्। किञ्चित्कालानन्तरं जागरितं तं वनचरं रक्षणकार्ये नियोज्य कपिः निद्रामकरोत्। तदा तु व्याघ्रवचनेन सञ्चोदितः कृतघ्नः अयं वनचरः निद्राणं कपिमधः पातितवान्। दैवात् जागरितः कपिः कथमपि आत्मानं रक्षितवान्। तदानीमपि कपिः करुणया तं वनचरं रक्षितवान्। समग्रमपि एतं वृत्तान्तं कविः एकैनैव श्लोकेन एवं सङ्गृह्णाति –

अस्मिन्नेव महावने वनचरो भीतो नरो व्याघ्रतः
कश्चिच्छाखिनमारुरोह शरणं प्रापच्च कञ्चित्कपिम्।
निद्रालुं विनिपात्य तं कपिमधस्तद्व्याघ्रसञ्चोदनात्
स्वस्य क्षेपणमाश्रुतेन कपिना तेनैव संरक्षितः ॥14॥

एतेन कवेः कथानकस्य संक्षेपीकरणसामर्थ्यं ज्ञातं भवति। अन्यच्च अत्र अनुसृतः कस्मिंश्चित् निर्दिष्टे स्थाने स्थित्वा तत्र पूर्वप्रवृत्तस्य कस्यचित् वृत्तान्तस्य स्मरणरूपः एषः क्रमः महाकवेः भवभूतेः उत्तररामचरितस्य प्रसङ्गमेकम् अनुकरोति। तत्र सीतायाः प्रियसखी वासन्ती लतागृहं किञ्चित् प्रदर्शयन्ती तत्र पूर्ववृत्तमेवं स्मारयति –

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते ।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुडलनिभो मुग्धः प्रणामाञ्जलिः ॥*(3-37)*

भवभूतेः प्रभावः शिङ्गरार्यस्य काव्ये अस्तीत्यस्य एकं प्रमाणमेतत् । शिङ्गरारस्य अन्येषां बहूनां प्राचीनसंस्कृतग्रन्थानां परिचयः – न केवलं परिचयः, तेषु परिणतिरपि – आसीत् । यतः अन्येषु ग्रन्थेषु प्रयुक्तान् अलङ्कारान् मनसि निधाय, रमणीयान् श्लोकान् विचित्य, स्मृत्वा तत्सदृशानेव श्लोकान् रचयितुं तेन महान् प्रयत्नः कृतः इति चम्पूकाव्यस्यास्य अवलोकनेन अस्माभिः ज्ञातुं शक्यते ।

पञ्चमे प्रपञ्चे तत्सदृशमन्यदपि उदाहरणमस्ति । तत्र च कविः रात्रिमेवं वर्णयति –

वियद्द्रुमान्तर्भुवि रात्रिवायसी निशाकराण्डं विनिवेश्य पाण्डुरम् ।
कळङ्कशाबाय सितोडुतण्डुलं पुरैव संगृह्य किलाभिरक्षति ॥25॥

रात्रिः एव काचित् काकी । श्वेतः चन्द्रः एव तस्याः अण्डम् । क्रमेण तदण्डं भिन्नं सत् कळङ्कशाबकः बहिरागच्छति । एवमागमिष्यतः शाबकस्य खादनार्थं किमपि धान्यमावश्यकं खलु ! श्वेतानि नक्षत्राण्येव तण्डुलाः । तादृशान् तण्डुलान् पुरतः संस्थाप्य नान् रात्रिकाकी रक्षति !

अलङ्कारशास्त्रे सुप्रसिद्धे अप्पय्यदीक्षितविरचिते कुवलयानन्दे निदर्शनालङ्कार–प्रकरणे उदाहृतस्य –

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी–
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥

इत्यस्य साक्षात् प्रभावः एतस्मिन् श्लोकेऽस्तीति स्पष्टं ज्ञायते । रात्रिकापालिक्याः रात्रिवायस्याश्च सादृश्यं सहृदयैः अवगम्यते एव । किञ्च तच्छायायां सत्यामपि अत्र कविना कृतायामेतस्यां कल्पनायां नावीन्यं चमत्कारश्च स्तः एव इत्यत्र नास्ति संशयः ।

भगवतः नृसिंहस्य वर्णनमित्थं करोति कविः –

प्रह्लादेन सुतेन सन्ततमुपन्यस्तानि सत्त्वाक्षराण्यस्मिन्
दुष्टतमस्य चेतसि रिपोर्लग्नानि वा नैव वा ।

इत्युन्मील्य दृशौ सुदूरमथ यो भित्वास्य वक्षो
नखज्वालापञ्चकदीपिकां प्रचुरयन्नन्वैषतेवैक्षत ।।68।।

हिरण्यकशिपोः पुत्रः प्रह्लादः निरन्तरं तत्त्वाक्षराणि वदन्नेवासीत्। तेषु द्वित्राणि वा अक्षराणि हिरण्यकशिपोः चेतसि लग्नानि वा इति द्रष्टुं भगवतः नरसिंहस्य कुतूहलम् उत्पन्नम्। अतः तदर्थमेव हिरण्यकशिपोः वक्षःस्थलं भित्वा नखज्वालारूपैः दीपैः तत्र अन्वेषणं कृतवान् इव स्थितः नृसिंहः विराजते।

षष्ठे च प्रपञ्चे कविना रामानुजस्य चरितं वर्णितमस्ति। एवं च काव्येऽस्मिन् कृतयुगाद् आरभ्य कलियुगपर्यन्ता कथा अनुवर्तते। तथापि कुत्रापि नीरसता यथा न भवेत् तथा काव्यरचनार्थं कविना यत्नः कृतः अस्ति। परन्तु षष्ठे प्रपञ्चे कथाभागस्यैव आधिक्य-वशात् कुत्रचित् अपेक्षितप्रमाणेन वर्णनं, स्पष्टतया विवरणं वा नास्तीति भासते। सत्यामपि एतादृश्यां न्यूनतायां 'एको हि दोषो गुणसन्निपाते निमज्जति' इति वचनमनुसृत्य चम्पूकाव्यमिदं सहृदयहृदयावर्जकं च सत् शोभते एव।

इ. पद्यकाव्यानि

शिङ्गरार्येण अनेकानि पद्यकाव्यानि रचितानि सन्ति। अध्ययनस्य विमर्शस्य च आनुकूल्यं मनसि निधाय तानि त्रिषु भागेषु एवं विभक्तुं शक्यन्ते।

1. प्रथमः भागः

1. दाशरथिचरितम् 2. श्रीकृष्णकथारहस्यम् 3. श्रीकृष्णलीला 4. श्रीकृष्ण-कौमारलीला 5. दर्पणदशकम् 6. संमार्जनीस्तुतिः

2. द्वितीयः भागः

स्तोत्रकाव्यानि

3. तृतीयः भागः

प्रक्षिप्तानि पद्यकाव्यानि

अनेनैव प्रकारेण सर्वेषामपि एतेषां पद्यकाव्यानां परिचयः, विशिष्टानां केषाञ्चित् विमर्शः च इतः अग्रे क्रियते।

प्रथमः भागः

प्रथमभागे उल्लिखितानि षड् अपि काव्यानि विशेषतया काव्यगुणोपेतानि सन्ति। तेषु एकैकस्य अपि परिशीलनेन एतत् स्पष्टं भवति। अतः तदेव अत्र क्रियते।

1. दाशरथिचरितम्

भगवतः श्रीरामस्य कथामेव अवलम्ब्य शिङ्गरार्येण विरचितं सुन्दरं पद्यकाव्यमिदं 'दाशरथिचरित'नामकम् । शिङ्गरार्यविरचितेषु काव्येषु एतदेव अर्वाचीनमिति वक्तुं शक्यम् । काव्येऽस्मिन् त्रयः अध्यायाः सन्ति । यदुशैलचम्वामिव अत्रापि कविः अध्यायं 'प्रपञ्च'शब्देन निर्दिशति । श्रीरामजननादारभ्य तत्पट्टाभिषेकपर्यन्तः कथाभागः अत्र कविना पुनारचितोऽस्ति । परं रामायणे यथा काण्डविभागः अस्ति तथात्र प्रपञ्चविभागः कृतः नास्ति । त्रिष्वेव प्रपञ्चेषु सर्वापि कथा यथा अन्तर्गता स्यात् तथा संक्षिप्तरूपेण लिखितमस्ति ।

त्रिष्वपि प्रपञ्चेषु किञ्चित् वैशिष्ट्यं दृष्टिगोचरं भवति । स्वविज्ञापनायां कविरेव तद्विषये विवरणं लिखति । प्रथमे प्रपञ्चे सर्वाणि पद्यानि अर्थान्तरन्यासालङ्कारयुतानि सन्ति । द्वितीये यमकालङ्कारयुतानि, तृतीये च नानावृत्तैः उपशोभितानि सन्ति ।

प्रथमः प्रपञ्चः

श्रीमद्रामायणे बालकाण्डे अयोध्याकाण्डे च यत् कथावस्तु दृश्यते तदेवात्र अतीव संक्षिप्तरूपेण वर्णितमस्ति । अष्टचत्वारिंशता श्लोकैः एव तावद्दीर्घं कथाभागं निबन्धुम् इच्छन् कविः तदर्थं महान्तं प्रयत्नं कृतवान् अस्ति । अतः एव उपकथारूपेण वाल्मीकिना निबद्धाः सर्वाः अपि कथाः एतेन त्यक्ताः सन्ति । तन्मध्ये 'प्रतिश्लोकम् अर्थान्तरन्यासः योजनीयः एव' इति स्वात्मना कृतं सङ्कल्पं यथार्थयितुमपि तेन प्रयत्नः कृतोऽस्ति । तत्र यशः तेन प्राप्तमस्ति । कानिचित् उदाहरणानि वयं परिशीलयितुं शक्नुमः ।

पुत्रकामेष्टेः अनन्तरं दशरथस्य तिस्रः अपि पत्न्यः पुत्रान् प्रापुः । कविः लिखति –

आद्या तु रामं सुषुवे सुमित्रा शत्रुघ्नमार्या सह लक्ष्मणेन ।
कैकेय्यसावीत् भरतं किमुक्त्या संपत्पुनस्संपदमभ्युपैति ॥10॥

कौसल्या रामं, सुमित्रा लक्ष्मणशत्रुघ्नौ, कैकेयी च भरतं प्रसूतवत्यः इत्यंशं विलिख्य ततः कविः वाक्यमेकं निबध्नाति 'किमुक्त्या ? सम्पत् पुनः संपदमभ्युपैति' इति । तन्नाम लोकेऽपि वयं पश्यामः यत् यत्र सम्पदस्ति तत्रैव पुनरपि सम्पत् गच्छति । लक्ष्म्याः स्वभावः एव सः । यावत्पर्यन्तं दशरथः पुत्ररहितः आसीत् तावत्पर्यन्तं तस्य दुर्दशैव आसीत् । यदा एकः पुत्रः प्राप्तः, ततः अन्येऽपि त्रयः तेन प्राप्ताः ।

विश्वामित्रेण सह मिथिलां गतः रामः तत्र शैवधनुषः भञ्जनम् अकरोत् ।

शापादहल्यां पथि मोचयित्वा रामः श्रियं भूमिसुतामवाप्तुम् ।
शैवं धनुर्दुर्धरमप्यभाङ्क्षीत् प्राप्तुं श्रियं ह्यद्भुतकर्म कार्यम् ॥18॥

श्रीरामेण कृतं धनुर्भञ्जनं तु असाधारणं कार्यम् । तेन खलु रामेण सीता प्राप्ता । परं कविः तत्र आश्चर्यं न पश्यति । यतः 'श्रियं प्राप्तुम् अद्भुतं कर्म कार्यं हि !'

वृद्धः राजा दशरथः स्वज्येष्ठपुत्रं श्रीरामं सिंहासने अभिषिच्य स्वयं योगेन निश्रेयसं प्राप्तुमियेष –

राजा जराजीर्णतनुः कदाचित् रामं समर्थं स्वपदेऽभिषिच्य ।
योगेन निश्रेयसमाप्तुमैच्छदमुत्रदृष्टिर्हि भवेद्विवेकी ॥26॥

'योगेनान्ते तनुत्यजाम्' इति कालिदासेन रघुवंशमहाकाव्ये यथा वर्णितमस्ति तथा दशरथोऽपि स्वकर्तव्यं समाप्य तनुत्यागं कर्तुमैच्छत् । तदीयं निर्णयं साधुं मन्यमानः कविः वदति – 'अमुत्रदृष्टिर्हि भवेद्विवेकी' इति ।

अष्टचत्वारिंशति श्लोकेषु अपि कविना अर्थान्तरन्यासालङ्कारः निबद्धः अस्ति । तत्र विशेषवचनस्य समर्थनार्थं किञ्चित् सामान्यवचनं निबन्धनीयं खलु ? तथा कविना यानि वचनानि निबद्धानि सन्ति तानि बहुशः अन्येषु सुप्रसिद्धेषु संस्कृतकाव्येषु कविभिः प्रयुक्तानां वचनानां संवादीनि सन्ति । तेषां वाक्यानां तुलनात्मकमध्ययनम् एतमभिप्रायं पुष्टीकरोति । उदाहरणार्थं कानिचित् वचनानि अत्र संगृहीतानि सन्ति –

अन्यत्र प्रयुक्तम्	**शिङ्गरार्येण प्रयुक्तम्**
राजानो बहुवल्लभाः ।	प्रायो नृपाला बहुवल्लभाः हि ।
बेळेयुव सिरि मोळकेयल्लि । (कन्नडभाषायाम्)	प्रायश्चकास्त्यङ्कुर एव शक्तिः ।
विद्याविहीनः पशुः ।	विद्याविहीनः पशुरेव नूनम् ।
महात्मनां वेत्ति गुणान् महात्मा ।	नागुणी गुणिनं वेत्ति ।
अतिस्नेहः पापशङ्की ।	स्नेहातिरेकः किल पापशङ्की ।
सन्तः परार्थे निहिताभियोगाः ।	सन्तः परार्थैकपराः भवन्ति ।
गुणैर्विहीनाः बहु जल्पयन्ति ।	वृथा न जल्पन्ति हि कार्यदक्षाः ।
श्रेयांसि बहुविघ्नानि ।	श्रेयांसि नूनं बहु विघ्नयन्ति ।
ईश्वरेच्छा बलीयसी ।	नूनं विधेरेव बलीयसीच्छा ।
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ।	पूज्यत्वहेतुस्सुगुणो हि नान्यत् ।

मनस्येकं वचस्येकं कर्मण्येकं शुद्धात्मानो मनसि बहिरप्येकरूपा
महात्मनाम्। भवन्ति।

तन्नाम, तादृशैः वचनैः प्रभावितः शिङ्गरार्यः तमेव अभिप्रायं स्वकीयैः शब्दैः वक्तुं प्रयत्नं कृतवान् अस्ति इति ज्ञातं भवति।

द्वितीयः प्रपञ्चः

द्वितीयेऽस्मिन् प्रपञ्चे सर्वाण्यपि पद्यानि यमकालङ्कारयुक्तानि रचितानि सन्ति कविना। समानशब्दानां पुनरावृत्तिः सर्वेषु अपि श्लोकेषु दृश्यते। यथा –

विपिनगोऽपि नगो नगरोपमः। *(5पद्ये)*
रघुवरोऽवसदत्र समुल्लसच्छ्रमदमो मदमोहनिरासक्तः। *(7पद्ये)*
अकृतकाः कृतकाः इव रेजिरे। *(8पद्ये)*
तदनुजो दनुजोदयविद्विषम्। *(9पद्ये)*
दधावकृतके कृतकेलिरसौ मुदम्। *(10पद्ये)*
वनेऽभ्रमदसौ मदसौरभनागवत्। *(13पद्ये)*

यतोऽत्र सर्वत्र यमकालङ्कारः प्रयुक्तः अतः पाठकानामर्थबोधः कदाचिन्न भवेदिति कवेः मनस्यपि संशयः। अतः सः स्वयमेव प्रतिश्लोकमन्वयं विलिख्य तत्र तत्र केषाञ्चित् शब्दानामर्थमपि आवरणे दर्शयति। कुत्रचित् पद्यस्य तात्पर्यमपि स्वीयेन वाक्येन आविष्करोति। पाठकानामर्थावगमनदृष्ट्या एतदुचितमेव।

श्रीरामस्य चित्रकूटगिरौ वासः एव एतस्मिन् प्रपञ्चे 118पद्यैः विस्तरेण वर्णितोऽस्ति। तन्नाम कथावस्तुदृष्ट्या प्रगतिः न दृश्यते एव। तत्रापि रामेण सीतामुद्दिश्य क्रियमाणस्य वनसौन्दर्यवर्णनस्य निमित्तमेव कविना त्रयस्त्रिंशत् श्लोकाः निबद्धाः सन्ति। ततश्च काकासुरवृत्तान्तः षट्त्रिंशता श्लोकैः वर्णितः। एतदुभयमपि तत्र तत्र नीरसमस्ति।

परं तत्र तत्र निबद्धानि –

'गिरिरयं सुमनोहर इत्यहो दिवि सुखं विमुखं परिदृश्यते।' *(39तमे पद्ये)*
'परमधाम्नि सुखं यदिहास्ति मे विभवतो भवतो ननु सन्निधौ।' *(61तमे पद्ये)*

इत्येतादृशानि वचनानि तु अतीव मनोहराणि सन्ति। तथापि 'प्रतिश्लोकं यमकालङ्कारः योजनीयः एव' इति कवेः आग्रहबुद्ध्या तत्र तत्र काव्यसौन्दर्यं लुप्तं वा इत्यपि संशयः वाचकान् बाधते।

तृतीयः प्रपञ्चः

नानावृत्तैः रचितानि द्विनवतिः पद्यानि अत्र सन्ति । श्रीरामस्य दण्डकारण्यप्रवेशतः आरभ्य पट्टाभिषेकपर्यन्तः कथाभागः अत्र स्वीकृतोऽस्ति । परन्तु तावद्दीर्घस्य कथावस्तुनः निबन्धनं तावद्भिरेव श्लोकैः कृतमित्यतः कविना कथावस्तुनः संक्षेपीकरणं बहुत्र कृतम् । यथा – हनूमता लङ्कायामनुष्ठितं सर्वमपि कार्यजातमेकेनैव श्लोकेन इत्थं संगृहीतम् –

भङ्क्त्वाशोकवनं निहत्य समरे रक्षोधिपानक्षम–
प्याबद्धस्स्वयमिन्द्रजित्प्रणिहितात् ब्रह्मास्त्रतो मारुतिः ।
आनीतोऽथ दशाननान्तिकमसौ निन्दन् च तं रावणं
रक्षोदीपितवालपावकमहातिथ्याय लङ्कां ददौ ॥53॥

अन्यच्च, एतेषु श्लोकेषु केवलं कथावस्तु निबद्धमस्ति इत्यतः विशेषः वाग्विलासः वर्णनावैभवं वा न दृश्यते । अलङ्काराणां प्रयोगोऽपि अल्पः एव । इत्थं भासते यत् प्रायः कविना काव्यस्यान्तिमो भागः किञ्चित् त्वरयैव समापितः स्यादिति ।

एवं च शिङ्गरार्यविरचितमिदं दाशरथिचरितं यद्यपि काभिश्चित् न्यूनताभिरुपेतमिति भासते, तथापि तदधिकप्रमाणेन गुणैरपि उपेतमस्तीत्यपि वक्तुं शक्यते । श्रीकृष्णकथा–रहस्यस्य लेखनेन कृष्णस्य विषये स्वभक्तिं प्रकटयता कविना एतस्य दाशरथिचरितस्य लेखनेन श्रीरामविषयेऽपि भक्तिः प्रदर्शिता अस्ति ।

2. श्रीकृष्णकथारहस्यम्

चतुःषष्ट्या श्लोकैः उपेतस्य एतस्य काव्यस्य आदावेव कविः एवं टिप्पणीं लिखति – ‘अस्मिन् श्रीकृष्णकथारहस्याभिधाने स्तोत्रे श्रीकृष्णपरमात्मना अनुष्ठीयमानं सर्वमपि कार्यजातं स्वीयमत्स्यकूर्मादिपूर्वावतारेषु विरचितानां कार्याणामनुकरणमेवेति संगतिरत्र कल्पिता’ इति । एतेन काव्यस्यास्य विषयः स्पष्टतया निरूपितो भवति ।

‘मथुरायां कंसस्य राजभवनस्य कारालये जातोऽपि कृष्णः पितरं वसुदेवं मातरं देवकीं च विहाय गोकुलं प्रति किमर्थं गतः ?’ इति प्रश्नं पृच्छन् कविः स्वयमेव तस्य उत्तरं वदति – रामावतारे पित्रोः परोक्षे खलु रामः राक्षसान् मारितवान् । तद्वदेव कृष्णावतारेऽपि पित्रोः परोक्षे एव तान् हन्तुमिच्छन् सः तयोः सकाशात् दूरं गतवान् इति ।

पित्रोः समीपमपहाय गतः कुतस्त्वं
हे कृष्ण ! गोकुलमहो शिशुभाव एव ।
बाल्येऽहनं सुररिपून् रघुनायकोऽहं
पित्रोः समक्षमिति तद्वदिहोद्यतोऽसि ॥

एवमेव 'स्तन्यं दातुमागतामबलां पूतनां सः किमर्थं हतवान् ?' इति प्रश्नस्य उत्तरं वदति – रामावतारेऽपि आरम्भे ताटकासंहारः कृतः । ततः सर्वदा विजयः प्राप्तः रामेण । तद्वदत्रापि आरम्भे वनितासंहारमेव कर्तुम् इच्छता कृष्णेन तथा कृतम् इति ।

स्तन्यं प्रदातुमबलां समुपागतां प्राक्
क्षीरं पिबन् समवधीर्यदुनाथ कस्मात् ।
आदौ निहत्य वनितां रघुनायकोऽहं
प्रापं सदा विजयमित्यधुनाप्यहन् किम् ।।6।।

उपरितने श्लोकद्वयेऽपि हेतूत्प्रेक्षालङ्कारः सुन्दरतया निबद्धोऽस्ति कविना ।

श्रीकृष्णः गरुडवाहनः । तस्मिन्नर्थे कविना प्रयुक्तः अपरः शब्दः 'पत्ररथनाथरथः' इति । 'तादृशाय मह्यं साधारणः शकटः न रोचते' इत्यभिनयं कुर्वन् इव समीपमागतं शकटं (तन्नामकं राक्षसम्) चूर्णीकृतवान् कृष्णः' इति वर्णयति कविः अन्यस्मिन् श्लोके ।

चूर्णीचकर्थ शकटं निकटं गतं त्वं
डिम्बत्व एव बत दुस्सहचेष्टितोऽसि ।
श्रीनाथ ! पत्ररथनाथरथाय मह्यमेत–
न्न रोचत इति व्यभिनः किमेवम् ।।8।।

'करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयतः' बालस्य मुकुन्दस्य वर्णनमन्यत्रापि प्रसिद्धमेव । हरेः पादाङ्गुष्टचुम्बनविषये कविः विविधाः कल्पनाः करोति । यथा –

पादाङ्गुष्ठं सततमपि ते चुम्बतो बाललीलाम्
आलोक्यैवं मनसि कलये कृष्ण ! मायाकिशोर !
आक्रम्याङ्घ्रे भुवनमखिलं मां बलेस्सौविदल्लं
हन्ताकार्षीः पुनरपि तथा मा चरेति ब्रवीषि ।।9।।
बलिनृपतिमिवान्यं भक्तवर्गं पुरेव
क्वचिदपि नय मा भोः पाद ! पाताललोकम् ।
इति किमु वदसि त्वं पूर्वकृत्येऽनुतापात्
शरणमुपगतानां रक्षणापेक्ष शौरे ।।10।।

त्रिविक्रमावतारसन्दर्भे भगवतः पादः बलेः शिरः अवनमय्य तं पातालं प्रेषयामास । तत् स्मरन् 'हे पाद, पुनः तथा मा चर' इति स्वपादं वदन्नस्तीव कृष्णः इदानीं पादम् आकृष्य मुखसमीपे गृहीतवानस्ति । तं च पादं 'बलिमिव अन्यं कमपि भक्तजनं पुनः पाताललोकं मा नय' इति सः वदतीव इति कविः कल्पनां करोति ।

पुरा खलु विष्णोः पदकमलात् गङ्गा समुद्भूता इति कथा प्रसिद्धा। 'विष्णुपदोद्भवा' इति अत एव तस्याः नाम। इदानीं तु 'भवान् लालाजलासारस्य परम्पराभिः पादाम्बुजं सिञ्चन् अन्यामपि गङ्गानदीं स्रष्टुमुद्यतः किम् ?' इति कविः कृष्णं पृच्छति –

लालाजलासारपरम्पराभिः पादाम्बुजं वृष्णिकुलेन्द्र ! सिञ्चन् ।
वसुन्धरायामपि कामपि त्वं गङ्गानदीं स्रष्टुमिहोद्यतः किम् ॥12॥

रामावतारसन्दर्भे श्रीरामस्य पादस्पर्शकारणतः अहल्या शिलारूपं परित्यज्य मनुष्यरूपं प्राप इति कथा प्रसिद्धा। तत् मनसि निधाय अत्र कविः बहु चमत्कारपूर्वकं वर्णयति –

शिलामपि पुराकरोश्चरण सौम्य सीमन्तिनीं
ततस्त्वयि रहस्यहं मुहुरिह ब्रवीम्यानतः ।
अनेकशतयौवतैर्मम सदा रिरंसोर्भवांस्तथा
प्रतिपदं करोत्विति च किन्नु वा याचसे ॥13॥

श्रीकृष्णस्य गोपीभिः सह रासक्रीडा नितरां प्रसिद्धा। सर्वदा सः 'युवतिजनपरिवृतः' एव भवति। तथापि अनेकशतयौवतैः रन्तुमिच्छति। अतः कृष्णः स्वपादं मुखसमीपम् आनीय रहसि तं याचते – 'सौम्य ! पूर्वं तु भवान् शिलां सीमन्तिनीं कृतवान् एव। इदानीमपि भवान् प्रतिपदं तथैव करोतु, येन यदा यदा मया शिलास्पर्शः क्रियते तदा तदा काचित् युवतिः लभ्येत' इति।

कविकल्पनायाः प्रतिभायाश्च विलासः अत्र स्फुटं दृश्यते।

श्रीकृष्णस्य 'दामोदरत्वं' प्रसिद्धमेव। दाम उदरे यस्य सः खलु दामोदरः। तच्च दामोदरत्वं कथमायातमित्येतत् त्रिभिः श्लोकैः वर्णयति कविः –

बद्धानां जगतां स्थलं त्विह कृतं कुक्ष्यन्तरे श्रीपते !
मोक्षस्थानमिदं पदाम्बुजमिति प्रख्यापयन्ती नृणाम् ।
माता ते सुतवत्सलापि पदयोर्बन्धं विनैवासकृत्
त्वच्चेष्टासु बबन्ध हन्त सुदृढं दाम्नोदरं कोमलम् ॥14॥

यशोदा श्रीकृष्णस्य हस्तपादं न बद्धवती ; प्रत्युत तदीयम् उदरम्। तत्र कारणम् एवमस्ति – बद्धानां सर्वेषां जगतां स्थलं कृष्णस्य उदरमेव। तस्य पादम्बुजं तु मोक्षस्थानं, न पुनः बन्धस्थानम्। एतत् जानती एव यशोदा सुतवत्सलापि मोक्षस्थानयोः पादयोः बन्धनम् अकृत्वा कोमलस्यापि उदरस्य बन्धनं दाम्ना कृतवती !

श्रीकृष्णः एव महाविष्णुः। स तु 'पद्मनाभः'। तस्मात् पद्मात् ब्रह्मा उत्पन्नः इति तु कथा लोकविश्रुता। प्रकृतं कृष्णं दृष्ट्वा यशोदा 'एतस्य नाभौ पूर्वं सनालं कमलं यदुदभूत्

तद्यदि प्ररोहेत् तर्हि कृष्णस्य पीडा भवेत्’ इति मत्वा इव यथा तत् कमलं न प्ररोहेत् तथा तस्य उदरं दाम्ना बद्धवती –

अस्यैव नाभौ कमलं सनालं पुरोदभूदद्य यदि प्ररोहेत् ।
पीडा भवेदित्युदरं किमेषा चेष्टावरोधच्छलतो बबन्ध ॥15॥

श्रीकृष्णेन कृतस्य यमलार्जुनभञ्जनस्य वर्णनं कैश्चित् श्लोकैः करोति कविः ।

सुग्रीवविस्रम्भकृते रमेश ! न्यपातयः त्वं किल सप्त सालान् ।
अद्यापि तद्वासनयैव सालयुग्मं व्यभाङ्क्षीश्शिशुलीलयैव ॥17॥

त्रेतायुगे श्रीरामावतारकाले श्रीरामः सुग्रीवस्य विश्वाससम्पादनाय एकेनैव शरेण सप्त सालवृक्षान् युगपद् चिच्छेद । रामावतारे कृतस्य तस्य सालवृक्षभञ्जनस्य वासना अद्यापि कृष्णे अस्ति । तया वासनया एव सः यमलार्जुनवृक्षयोः भञ्जनं चकार ।

अन्यस्मिन् श्लोके कविः श्लेषमाश्रयते । श्रीकृष्णः अर्जुनस्य (कुन्तीसुतस्य) रक्षणं कर्तुमिच्छति । परन्तु सः अर्जुनस्य (तन्नामकवृक्षस्य) भञ्जनेच्छुः एव सञ्जातः । एतत् कथं सम्भवति? इति यदा चिन्तयामि तदाहं स्मरामि यत् कृतयुगे यः परशुरामः आसीत् सः अर्जुनस्य (कार्त्तवीर्यार्जुनस्य) वधं कृतवान् । अतः भवानेव पूर्वं परशुरामः आसीदिति अहं निश्चिनोमि । तादृशस्य भवतः अर्जुनभञ्जनेच्छा सङ्गच्छते एव ।

त्वमर्जुनं रक्षितुमेव काङ्क्षन् यदाभवस्तत्परिभञ्जनेच्छुः ।
तदा पुराणं भृगुनन्दनत्वं त्वय्याविरासीदिति निश्चिनोमि ॥20॥

नवनीतचोरः श्रीकृष्णः । क्षीरदधीत्यादीनां चौर्ये सः नितरां निपुणः । ‘सत्यामपि स्वगृहे क्षीरदधिनवनीतादिसमृद्धौ, किमर्थं सः अन्यानि अपि गृहाणि गत्वा तानि चोरयति’ इति चिन्तयन् कविः तत्र कारणानि एवं कथयति –

नन्दान्वयेन्द्र ! तव गोकुलमन्दिरेषु
क्षीरं विलुण्ठ्य बहुशः पिबतोऽपि शश्वत् ।
तृष्णा यतो न विरराम ततोऽत्र शङ्के
नाद्यावतारयुगलेऽप्यपिबः पयांसि ॥22॥

आद्यावतारयुगले (मत्स्यावतारे कूर्मावतारे च) भगवान् पयः न पीतवान् स्यात् । (पयस्-शब्दस्य जलं क्षीरं चेति अर्थद्वम् । मत्स्यस्य कूर्मस्य च कथमपि क्षीरपानस्य प्रसक्तेः अभावात् वचनमिदं चारु सङ्गच्छते ।) अतः इदानीं कृष्णः गोकुलमन्दिरेषु क्षीरं विलुण्ठ्य पिबति । तथापि तस्य तृष्णा नैव विरराम ।

सस्यस्य सम्यक् प्रवर्धनाय पयसः गोभरादीनां च आवश्यकता भवति । कृष्णस्य नाभौ तु कमलाङ्कुरः अस्ति । सः सम्यक् प्ररोहतु इति बुद्ध्या कृष्णः पुनः पुनः पयः पिबन् तं सिञ्चति किम् ? इति उत्प्रेक्षां करोति कविः अग्रिमे श्लोके । तद्यथा –

नाभौ निगूढः कमलाङ्कुरो मे पुनर्जगत्सृष्टिविहारकाले ।
सम्यक्प्ररोहत्विति वाधुनैव पयः पिबन् सिञ्चसि किं स्वकुक्षौ ॥23॥

आत्ममुखे दर्शितानां निखिलजगतां पोषणमिच्छति कृष्णः । क्षीरादिपानेन पोषणं भवति खलु, अतः यशोदया बहुधा भर्त्सितोऽपि सः प्रतिगृहं गत्वा दुग्धं पिबति ।

अथवात्ममुखेऽभिदर्शितानां निखिलानां जगतां च परिपोषणाय ।
बहुधा परिभर्त्सितोऽपि गोप्या पिबसि त्वं प्रतिमन्दिरं च दुग्धम् ॥24॥

अन्येषां गोपानां गृहाणि प्रविश्य कृष्णः दधि दुग्धं च लुण्ठयति । तं ग्रहीतुं गोप्यः यदा आगच्छन्ति तदा कृष्णः स्वकीयानि लघूनि अङ्गानि पुनरपि सङ्कोच्य यथा ताः न पश्येयुः तथा तिष्ठति । एषः अङ्गसङ्कोचक्रमः तेन पूर्वं कूर्मावतारे एव शिक्षितः –

लुण्ठित्वा दधिदुग्धमन्यसदनेष्वालोलनेत्रः पिबन्
गोपीषु ग्रहणार्थमागतवतीष्वप्राप्तगत्यन्तरः ।
सङ्कोच्याथ निजाङ्गकानि निभृतस्तत्रैव नालक्ष्यथाः
कूर्माकारभृता त्वया खलु पुरा संशिक्षितोऽयं क्रमः ॥26॥

श्रीकृष्णः सर्वेश्वरः सर्ववित् च । तादृशस्य तस्य गोपबालाः कथं वा सुहृदः सञ्जाताः? इति प्रश्नं कृत्वा कविः स्वयमेव तस्य समाधानं वदति अन्यस्मिन् श्लोके –

सर्वेश्वरस्य तव सर्वविदः कथं वा
जातास्सखाय इह बालिशगोपबालाः ।
सुग्रीवमुख्यकपिसख्यमपि प्रकल्प्य
क्रीडां विधातुरथवा तव तेऽनुरूपाः ॥27॥ इति।

श्रीकृष्णेन कृतस्य कालियमर्दनस्य कारणं त्रिभिः श्लोकैः वर्णितमस्ति तेन । तद्यथा –

कालीयमर्दनविधौ तव कोपहेतुः
ज्ञातः पुरा पुरहरस्य शरो यदाभूः ।
मौर्वीकृतेन भुजगेन तदा सुदूरं
निष्कासितोऽहमिति तं तुदसीह शौरे ॥29॥

पूर्वं त्रिपुरमथनकाले आदिशेषः भगवतः रुद्रस्य धनुषः मौर्वी आसीत् । विष्णुश्च शरः । बाणप्रयोगावसरे मौर्वीं सम्यक् आकृष्य ततः शरं दूरं प्रेषयन्ति खलु ? तदा मौर्वीभूतेन

शेषेण शरत्वमापन्नः हरिः सुदूरं निष्कासितोऽभवत्। अतः 'एतेन दुष्टेन शेषेण अहं सुदूरं प्रेषितः' इति हरेः कोपः आसीत्। अत एव सः कालियं निर्दयं तुदति !

अन्यच्च त्रेतायुगे रावणपुत्रेण इन्द्रजिता प्रयुक्तं सर्पास्त्रं रामस्य यशः जहार इत्यतः रामः सर्पस्य विषये नितरां क्रुद्धः आसीत्। इदानीं तदेव स्मरन् श्रीकृष्णः सर्पं कालीयं निर्दयं तुदति इति कविः अन्यस्मिन् श्लोके उत्प्रेक्षते। यथा –

अथवेन्द्रजिता प्रयुक्तमस्त्रं भुजगो रामतनोः प्रकल्प्य मूर्च्छाम्।
मम शौर्ययशो जहार हन्तेत्यतिरोषात्तुदसीह तं भुजङ्गम् ॥30॥ इति।

'भवता त्वया द्वौ तिर्यञ्चौ प्राणिनौ पूर्वं सन्त्रासितौ, अनन्तरं सन्त्रातौ' इति कविः कृष्णं वदति अग्रिमश्लोके। तयोः एकतरः काकासुरः, अपरः काकोदरः।

सन्त्रासितौ त्वया द्वौ तिर्यञ्चौ प्राक् ततस्तु सन्त्रातौ।
रघुपतिनैकः काकः परस्तु काकोदरोऽद्य यदुपतिना ॥31॥

रामायणे यदा काकासुरः सीतां पीडयितुम् उद्युक्तः तदा रामः तमुद्दिश्य ब्रह्मास्त्रं प्रयुक्तवान्। भीतः काकासुरः त्रिषु लोकेष्वपि त्रातारमपश्यन् राममेव शरणं गतः। रामः करुणया तस्य एकं नेत्रं केवलं विनाश्य तं रक्षितवान्। एवं च सः काकः रामेण प्रथमं सन्त्रासितः, पश्चाच्च सन्त्रातः। कालियस्य अपरं नाम काकोदरः इति। तदुपरि नृत्यं कुर्वन् श्रीकृष्णः तं मर्दयन् प्रथमं सन्त्रासितवान्। अनन्तरं च शरणागतं तं रक्षित्वा समुद्रं गन्तुम् आदिदेश। एवम् एषोऽपि प्रथमं सन्त्रासितः, ततः सन्त्रातः।

समुद्रमथनकाले मन्दरपर्वतं धृतवतः विष्णोः भारवहनकर्मणि अभ्यासः आसीदेव। तेन अभ्यासेन प्रकृतं लीलया गोवर्धनोद्धरणं कृष्णः कृतवान् इति वर्णयति कविः –

देवेन्द्रे कुपितेऽथ वर्षति तथा लोकेऽपि शोकाकुले
सर्वज्ञोऽप्यविदन्नुपायमपरं श्रान्तिं विना लीलया।
यद्गोवर्धनपर्वतं समवहस्तत्रास्ति शौरे ! महान्
अभ्यासस्तव मन्दरक्षितिधरं धृत्वा समासादितः ॥33॥

श्रीकृष्णस्य वेणुवादनं विश्वप्रसिद्धम्। वेणुगानलोलः खलु सः ! किमर्थं सः तथा मधुरमधुरं वेणुवादनं करोति इति चेत्, कविः कथयति –

किमर्थं कान्तारे यदुकुलमणे ! पर्यटसि वा
कुतस्तस्मिन् वेणुं मधुरमधुरं वादयसि च।
पुरा मां रामत्वे हरिणहतकोऽवञ्चयदिति
प्रतार्यैतान् हन्तुं विपिनभुवि नूनं प्रयतसे ॥37॥

रामावतारकाले मारीचः धृतहरिणरूपः तम् अवञ्चयत् खलु ? तदेव स्मरन् कृष्णः अस्मिन् जन्मनि अहमेव मृगान् वञ्चयामि इति निश्चित्य तदर्थमेव वेणुवादनं करोति ।

'जलक्रीडासमासक्तगोपीवस्त्रापहारकः' इति श्रीकृष्णस्य अपरं नाम । 'किमर्थं तेन गोपीनां वस्त्रापहरणं कृतम्' इति चेत् कविः इत्थम् अभिप्रैति –

नीरक्रीडाचपलललनासंघविन्यस्तनाना–
कौशेयानामपहरणतो वेद्मि ते भावबन्धम् ।
क्रन्दिष्यन्त्याः द्रुपददुहितुर्दातुमह्नाय तानि
प्राक् सन्नद्धः किल समभवो भक्तसन्त्राणदीक्षः ॥38॥

श्रीकृष्णः 'भविष्यति काले द्रौपद्यै दातुं वस्त्राणाम् अक्षय्यः सङ्ग्रहः मयि भवेत्' इति विचिन्त्य वस्त्रसङ्ग्रहणार्थं गोपीनां वसनानि जहार । अत्यद्भुता कल्पना एषा ।

ततः श्लोकद्वयेन कंसवधं वर्णयति कविः । तद्यथा –

कंसं तथात्मबन्धुं स्वयमेव कथं रमेश ! समहस्त्वम् ।
मातुर्हन्ता त्वमभूर्मातुलहन्ताद्य हन्त ते चेष्टा ॥42॥

परशुरामावतारसन्दर्भे पितृवाक्यपरिपालनाय सः मातरं रेणुकामेव हतवान् आसीत् । सः एव मातृहन्ता इदानीं मातुलहन्ता अभवत् इत्येतत् युज्यते !

कंसं हन्तुं प्रहरणमनादृत्य तस्योपरिष्टात्
निष्पत्याहन् सुनिपुण ! भवानत्र कोऽप्यस्ति हेतुः ।
प्राग्लङ्केशो मुहुरपि मया च्छिन्नकण्ठोऽपि बाणैः
उद्यन्मूर्धाभवदयमरिस्तादृगित्यस्ति ते धीः ॥43॥

रावणवधप्रसङ्गे श्रीरामेण बाणप्रयोगः कृतः, तेन रावणस्य शिरश्छेदोऽपि जातः, परन्तु च्छिन्नमपि रावणशिरः पुनः पुनः उद्भवति स्म । बाणप्रयोगे कृते सति पुनरपि तादृशी एव अवस्था भवेदिति कृत्वा श्रीकृष्णः कंसवधप्रसङ्गे आयुधस्य उपयोगमेव न कृतवान् । तदुपरि निष्पत्य मुष्टिप्रहारेणैव तं मारितवान् ।

निर्धनेन मित्रेण कुचेलेन समर्पितं पृथुकं कृष्णः प्रीत्या स्वीकृतवान् इति कथां वयं जानीमः एव । परं सः कुचेलः प्राणप्रियाय मित्राय अतिसामान्यं चिपिटोपहारं कथं दत्तवान् इति चेत् कविः वदति –

रामावतारे त्वमगाः फलानि शुष्काणि भोक्तुं श्रमणीकुटीरम् ।
तस्मात् सखा ते विदितान्तरङ्गः प्रादात्कुचेलः चिपिटोपहारम् ॥52॥

कुचेलः जानाति स्य यत् श्रीरामः शबर्याः कुटीरं स्वयमेव गत्वा तया दत्तानि फलानि प्रीत्या स्वीकृतवान् इति । सोऽयं प्रभुः मया दीयमानम् अल्पमपि उपहारं सन्तोषेण स्वीकरोति एव इति तस्य दृढः विश्वासः असीत् । अतः सः तदेव दत्तवान् ।

काव्यस्यास्य अन्तिमे भागे सप्त श्लोकाः सम्भाषणात्मकाः सन्ति, यत्र च श्रीकृष्णः स्वपत्नीभिः सह सम्भाषणं कुर्वन् स्वपूर्वावतारचेष्टितानि सर्वाणि अपि स्मारयति । तत्र मत्स्यावतारद्योतकः श्लोकः एवम् अस्ति –

नैर्घृण्यं बत वल्लभ ! प्रियतमास्वस्मासु युक्तं नु किम्
भीतास्त्वय्यनुपस्थिते निशि वयं तत्सोमकस्यागमात् ।
किं ब्रूताब्जदृशो ! हतस्स तु मयैवाम्नायहर्ता पुरा
चन्द्रो भीतिकरः प्रिय ! प्रियतमाः ! मे मीनरूपं स्मृतम् ॥54॥

श्रीकृष्णस्य पत्न्यः वदन्ति – 'भो वल्लभ ! रात्रौ यदा भवान् समीपे न भवति तदा सोमकस्य दर्शनात् वयं नितरां भीताः स्मः' इति । तत्र सोमः एव सोमकः, तन्नाम चन्द्रः । कृष्णस्य अनुपस्थितौ विरहावस्थायां चन्द्रदर्शनं पीडामधिकां करोति इत्यभिप्रायेण ताभिः तथा उक्तम् । तच्छ्रुत्वा कृष्णः मत्स्यावतारकाले स्वेन कृतं सोमकदानवस्य वधं स्मृत्वा 'स तु मया पूर्वमेव मारितः' इति वदति । स्मृत्यलङ्कारस्य उदाहरणम् इदम् ।

कूर्मावतारद्योतके द्वितीयश्लोके प्रेयसी कृष्णं वदति – 'मुग्धां मामालिङ्ग्य किमर्थं पीडयसि ? मुञ्च' इति । कृष्णः वदति – 'तव कुचपर्वतयोः वहनेन ममापि पीडा भवत्येव' इति । 'तर्हि तौ किमर्थं वहसि?' इति सा पृच्छति । 'अमृतं प्राप्तुम्' इति कृष्णस्य उत्तरम् । 'तद्वहनेन अमृतप्राप्तिः कथं सम्भवति ?' इति पुनः तस्याः प्रश्नः । 'कूर्मावतारः तत्र साक्षी' इति कृष्णः वदति ।

मुग्धां मां परिरभ्य पीडयसि किं मुञ्च प्रिय ! त्वत्कुच–
क्षोणीभृद्वहनात् ममापि न हि किं पीडास्ति चन्द्रानने !
एवं चेत्प्रिय ! तं किं वहसि भोः प्राप्तुं सुधां नाथ ! तत्–
धृत्या सा कथमाप्यतेऽत्र सखि ! मे कूर्माकृतिस्साक्षिणी ॥55॥

कुचपर्वतयोः वहनेन तदुपरि स्थिते मुखचन्द्रे विद्यमानस्य अधरामृतस्य प्राप्तिः भवति । अतः पर्वतवहनेन अमृतप्राप्तिः तु सुनिश्चिता एव !

नारसिंहावतारद्योतकः श्लोकस्तु ततोऽपि रमणीयः अस्ति । सः एवम् अस्ति –

प्रह्लादं वत्समारादुपगतमदयस्तत्पिताज्ञः प्रमत्तः
शृङ्गाग्रात्पातयित्वा व्यथयति तरुणीलोलुपस्त्वं न वेत्थ ।

किं किं कान्ते ! तथा चेन्नरहरिवपुषा हन्मि तं स्तम्भजस्सन्
को वा नाथोद्यमोऽयं वृषदमनविधौ भो हिरण्यस्मृतोऽरिः ॥57॥

कञ्चन वत्सं तत्पिता वृषभः प्रमत्तः सन् शृङ्गाग्रात् पातयित्वा तस्य पीडां जनितवान् । एतं वृत्तान्तं कृष्णं वदन्ती तत्प्रेयसी 'तरुणीलोलुपेन त्वया एतद् न ज्ञातमेव' इति निन्दति । श्रीकृष्णः हिरण्यकशिपुना कृतं पुत्रस्य प्रह्लादस्य पर्वताग्रात् पातनं स्मृत्वा 'अहं नरसिंहशरीरं धृत्वा स्तम्भोद्भवः सन् तं दुष्टं हिरण्यकशिपुं वधिष्यामि' इति उक्तवान् ।

सर्वास्वप्यबलासु ते प्रियतमा का नाथ ! सत्यं वद
त्वं राधे ! मम वल्लभा बत शठोऽस्येवं प्रिये ! मा वद ।
कुब्जां नाथ ! विधाय सुन्दरतनूं तस्यां तु सक्तः किल
भ्रान्ते ! कुब्जतनुः पुराहमभवं प्रीतिस्तु तत्रास्त्यतः ॥58॥

राधा कदाचित् कृष्णं पृच्छति यत् – 'कृष्ण ! सत्यं वद, सर्वासु स्त्रीषु तव अत्यन्तं प्रियतमा का ?' 'त्वमेव राधे !' इति कृष्णस्य उत्तरम् । परन्तु राधा तस्मिन् न विश्वसिति । 'मथुराप्रवेशसमये काञ्चित् कुरूपां कुब्जां कृष्णः सुरसन्दरीं कृतवान् । तस्यामेव सः अद्यापि आसक्तः' इति राधायाः आक्षेपः । कृष्णः वदति – 'कुब्जशरीरे मम आसक्तिः अस्ति इति तु सत्यमेव । वामनावतारप्रसङ्गे मया यत् धृतमासीत् तत् कुब्जशरीरमेव । अतः कुब्जतन्वां मम प्रीतिः' इति । एतेन तेन वामनावतारः स्मृतः ।

किं ते कान्त ! मनोज्ञकुन्तलभरे सान्द्रा हि रेणुः प्रिये
कुत्रासीद्विपिने गवां खुरभवा तां रेणुकां संहर ।
मा मा सुन्दरि तातवाङ्निगडितः पापं त्वकार्षं पुरा
नाथोन्मादवचः कुतस्सखि ! मया तद्भार्गवत्वं स्मृतम् ॥59॥

प्रियतमा कृष्णं पृच्छति – 'तव मनोज्ञे कुन्तलभरे किमस्ति ?' इति । 'तत्र सान्द्रा रेणुः अस्ति' इति कृष्णः वदति । 'सा कुत्रासीत् ?' इति पुनः पृष्टः सः वदति – 'अरण्ये सञ्चारसमये धेनूनां खुराघातेन उत्पन्ना सा रेणुः' इति । प्रियतमा 'तद् रजः दूरीकुरु' इत्यर्थे 'तां रेणुकां संहर' इति वदति । रेणुः एव रेणुका । 'रेणुकां संहर' इति वाक्यं श्रुत्वा श्रीकृष्णः परशुरामावतारे पितुः जमदग्नेः वचनम् अनुसृत्य स्वेन मातुः रेणुकायाः मारणं यत् कृतं तदेव स्मृतवान् । अतः एव सः '! पूर्वं तातवाक्यनिगडितः अहं रेणुकां संहृतवान् । इदानीं तु तादृशं पापकार्यं मा मा' इति । कृष्णस्य अभिप्रायमजानती सा 'उन्मादवचनानि किमर्थं वदसि ?' इति पृच्छति । कृष्णः 'मया भार्गवावतारः स्मृतः' इति वदति ।

एते सर्वेऽपि श्लोकाः स्मरणालङ्कारस्य सुन्दराणि उदाहरणानि सन्ति ।

काव्यस्यास्य अन्ते कविः यदुपतेः श्रीकृष्णस्य पदसेवासक्ताः सर्वेऽपि तस्य असीमायाः दयायाः पात्रतां गच्छन्तु। सुकवेः फणितयः अपि कृष्णस्य अनुग्रहं प्राप्य कीर्त्या समेताः सत्यः दशसु दिक्षु विजयन्ताम् इति आशास्ते। अस्य काव्यस्य विषये जनाः कीदृशम् अभिप्रायं प्रकाशयेयुः इति कवेः मनसि संशयः अस्ति। अतः सः अन्ते एवं लिखति –

अधुनातनेन केनचित्कृतं किमिहास्ति चेति कतिचित् व्युदासते।
यदुनाथ ! कृष्ण ! तव वृत्तमेतदित्यपरे स्तुवन्ति सकलं च तेऽर्पितम् ॥64॥

अधुनातनेन केनचित् लिखितमेतत्। किमस्ति अत्र ? इति केचन उपेक्षां कुर्युः। अन्ये केचन आधुनिकेन पुरातनेन वा केनापि लिखितं स्यान्नाम, तथापि कृष्णस्य चरित्रमेतत् इति कृत्वा आदरं प्रदर्शयेयुः। उपेक्षा, आदरः – एतदुभयमपि भवते एव अर्पितम् इति निवेदयन् कविः काव्यं समापयति।

शिङ्गरार्यस्य पद्यकाव्येषु कृष्णकथारहस्यमिदम् अत्युत्तमम् इति केषाञ्चन विदुषाम् आशयः। कल्पनादृष्ट्या, पदलालित्यदृष्ट्या वा परिशील्यमाने सति सः आशयः वास्तविकः एव इति भासते।

3. श्रीकृष्णलीला

श्रीकृष्णस्य लीलानां वर्णनपराणां नवानां श्लोकानां सङ्ग्रहः एषः। अत्र केचन श्लोकाः प्रश्नोत्तररूपेण अपि सन्ति। लीलाशुकस्य कृष्णकर्णामृते स्थिता सम्भाषणशैली अत्र अनुसृता अस्ति इति भासते।

काचित् गोपी कृष्णं पृच्छति – 'कृष्ण ! भवान् पूर्वमिव माम् इदानीं किमर्थं न चुम्बति ? वेणुवादनमपि किमर्थं न करोति ?'

अयि वल्लभ मां पुरेव कस्मादधुना त्वं नहि चुम्बसि स्मरार्ताम्।
महिलाहृदयापहारदक्षां मुरलीं वादयसीह नैव कस्मात् ॥1॥

तदा कृष्णस्य उत्तरम् एवं भवति –

पुरुषायितराधयाधरो मे व्रणितोऽभूद्भृशमङ्गनायितस्य।
तदहं मदिराक्षि वेणुगानेऽधरपानेऽस्मि तवाक्षमः क्षमस्व ॥2॥

'रासलीलासन्दर्भे राधा पुरुषः इव व्यवहरन्ती, महिला इव व्यवहरतः मम अधरं भृशं दष्टवती। तेन ममाधरः व्रणितः। अतः अहमिदानीं पूर्ववत् वेणुगाने तव अधरपाने वा असमर्थः अस्मि। क्षमस्व' इति। तन्नाम राधा कृष्णं तथा वशीकृतवती इत्यर्थः। 'सा कथं तथा कर्तुं शक्ता ?' इत्यस्य उत्तररूपेण अग्रिमं श्लोकम् इत्थं लिखति कविः –

राधा द्वेधा समाराध्य माधवं स्ववशे न्यधात् ।
अतुलेनानुरागेण भक्त्या विशुद्धयापि च ॥33॥

रासक्रीडानिरतः कृष्णः कदाचित् नेत्रे निमीलयति । तदा राधा तं पृच्छति – 'किमिदं कृष्ण ! दिनेऽपि तिष्ठन् एव निद्रां करोषि ?' इति । तदा कृष्णः वदति – 'एषा निद्रा न' इति । 'तर्हि नयने उन्मीलय' इति राधा वदति । कृष्णः वदति – 'तव मुखचन्द्रस्य श्वेतकिरणैः सन्ति मम नयनकमलं निमीलितम्' इति ।

हारक्रीडाप्रवृत्ते यदुकुलतिलके मीलिताक्षे मुकुन्दे
राधा पप्रच्छ चैनं प्रिय ! किमिह दिवाप्यद्य निद्रासि तिष्ठन् ।
निद्रा मे नैव कान्ते ! विकसय नयनं पुण्डरीकाक्ष तर्हि
प्राहेत्थं तां मुखेन्दोस्तव सितकिरणैर्मीलितं मे दृगब्जम् ॥4॥

अत्र अद्भुतः कार्यकारणभावः कल्पितः अस्ति कविना । राधायाः मुखमेव चन्द्रः । श्रीकृष्णस्य नयने एव कमले । चन्द्रोदये सति कमलानां सङ्कोचनं लोके प्रसिद्धम् । अत्र मुखचन्द्रस्य दर्शनेन नयनकमलयोः निमीलनं जातम् इति कल्पितमस्ति ।

शिङ्गरार्यः प्रधानतया भक्तकविः । अतः एव भगवतः विषये यावदपि लिखित्वा सः न तृप्यति । यथा भक्तकविः तथैव सः सरसकविः, रसिककविश्चापि । विशेषतया श्रीकृष्णस्य लीलाप्रसङ्गानां वर्णनसमये तस्य रसिकत्वं विजृम्भते । श्रीकृष्णलीलायाः एते श्लोकाः तत्र उदाहरणभूताः सन्ति –

कान्तेऽम्बरान्तः परिजृम्भमाणा
पयोधरश्रीसुखदा ममाक्ष्णोः ।
चैत्रेऽम्बुदः कृष्ण किमस्ति
मेघो नोक्तत्वदीयस्तनरम्यतोक्ता ॥7॥

कृष्णः गोपीं वदति – 'प्रिये ! अम्बरस्य अन्तः या पयोधरकान्तिः दृश्यते सा मम नेत्रयोः सुखदायिनी अस्ति' इति । ऋज्वर्थग्रहणशीला सा गोपी 'आकाशे मेघः दृश्यते' इत्यर्थं गृहीत्वा 'चैत्रकाले मेघदर्शनं कथं सम्भवति ?' इति मुग्धभावेन पृच्छति । तदा धूर्तः कृष्णः विवृणोति – 'मया मेघः न उक्तः । तव स्तनरम्यता उक्ता' इति ! अत्र अम्बरशब्दस्य वस्त्रम् इति, पयोधरशब्दस्य स्तनः इति च द्वितीयार्थः श्लेषमहिम्ना आविष्कृतः सन् नितरां सौन्दर्यम् आतनोति ।

अन्तिमे च श्लोके पुनरपि श्लेषमेव आश्रयते कविः । यथा –

वासः कुत्र मम प्रभो ! निवस मे शय्यागृहेब्जानने
पृष्टं नैव मया स्थलं किमपरं शौरेम्बरं मामकम् ।
यन्नग्नासि तदम्बराम्बरवती कान्ते भृशं भासि ही-
त्युक्त्वा नन्दसुतः प्रियां परिहसन् तामालिलिङ्गाङ्गनाम् ॥9॥

रासक्रीडमग्नः कृष्णः कस्याश्चित् गोपिकायाः वस्त्रम् अपहृतवानस्ति । सा गोपिका कृष्णं पृच्छति – 'मम वासः कुत्र ?' इति । धूर्तः कृष्णः जानन् अपि 'वास'शब्दस्य निवासः' इत्यर्थं गृहीत्वा 'हे कमलनेत्रे ! त्वं मम शय्यागृहे निवस' इति वदति । निवासस्थानं मया नैव पृष्टं भोः, अम्बरं पृष्टम् इति गोपी उवाच । 'त्वमिदानीं नग्नासि । अतः 'अम्बराम्बरवती' अस्ति । तन्नाम आकाशः एव तव वस्त्रमस्ति । तव एषा स्थितिरेव नितरां शोभते' इति वदन् कृष्णः ताम् आलिङ्गितवान् !

अत्र कविना कृतः 'अम्बराम्बरवती' इति प्रयोगः भृशं चमत्कारं जनयति । अयं तु श्लोकः –

कस्त्वं शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृष्ये विषाणे ।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवायाः
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ॥

अङ्गुल्या कः कवाटं प्रहरति कुटिले माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी किमुत खगपतिर्नो हरिः किं कपीन्द्रः
इत्येवं सत्यभामाप्रतिवचनजितः पातु वश्चक्रपाणिः ॥

इत्येतादृशान् सुप्रसिद्धान् चाटुश्लोकान् स्मारयति । संस्कृतसाहित्ये विपुलतया उपलभ्यमानानां तादृशश्लोकानां प्रभावादेव कविना एषः रचितः अस्ति इति भासते ।

4. श्रीकृष्णकौमारलीला

एतदपि लघुकाव्यं कृष्णलीलावर्णनपरकमेव । अष्ट श्लोकाः अत्र विद्यन्ते । काचित् मदालसा वधूः कृष्णे एव अनुरक्ता सती अपि तं प्राप्तुमशक्ता, मरणं प्राप्य परत्र कृष्णस्य समागमं प्राप्नोत् इति एकस्मिन् श्लोके कविः वर्णयति । अनेकाभिः व्रजवधूभिः सह कथं रासक्रीडाः करोति कृष्णः इति द्वित्रैः श्लोकैः वर्णितमस्ति । तासु एकैकापि गोपी कृष्णः मयि एव आसक्तः अस्ति, न अन्यासु' इति यथा चिन्तयेत् तथा व्यवहृतवान् कृष्णः इति अन्यत्र वर्णितमस्ति ।

अन्तिमे च श्लोके कृष्णस्य प्रणयधूर्तता इत्थं वर्णिता अस्ति –

कुञ्जेऽस्मिन् भव भोः प्रिये ! त्वमधुना सर्वा प्रतार्याङ्गना
आगच्छामि भवत्सकाशमिति ताश्शौरिर्वधूर्वञ्चयन् ।
राधासङ्गसुखप्रमोदरसिकः पश्चाच्चिरादेत्य ताः
नीतोऽहं पशुपालनाय विपिनं मित्रैरिति प्रच्युतः ॥8॥

सः काञ्चित् गोपीं वदति – 'एतस्मिन् लतामण्डपे एव तिष्ठ । अहम् अन्याः सर्वाः गोपीः प्रयार्य अत्रैव आगच्छामि' इति । सा तत् सत्यमिति अमन्यत । परं ततः प्रस्थितः कृष्णः राधायाः समीपं गत्वा तस्याः सङ्गमसुखं प्राप्य पश्चात् विलम्बेन प्रतिनिवर्तते । गोपीम् असत्यं वदति यत् 'मित्रैः पशुपालनार्थम् अहम् अरण्यं प्रति नीतः आसम् । अतः ममागमने विलम्बो जातः' इति ।

एवं च उपर्युक्तं काव्यद्वयमपि भगवतः श्रीकृष्णस्य लीलानामेव वर्णनार्थं कविना लिखितम् अस्ति । कवेः कृष्णविषयिणी भक्तिः अत्र प्रतिश्लोकं व्यज्यते । यद्यपि शिङ्गरार्येण कृष्णस्तोत्राणि बहूनि रचितानि सन्ति तथापि एतद्द्वयं पृथक्कृत्य अत्र काव्यविभागे अस्माभिः परिगणितम् अस्ति ।

यथा श्रीकृष्ण-वेङ्कटेश-हनूमत्प्रभृतयः देवाधिदेवाः शिङ्गरार्यस्य काव्यस्य विषयाः, तथा लोके नित्यजीवने अस्माभिः दृश्यमानानि अनेकानि वस्तूनि अपि तस्य काव्यस्य विषयाः भवन्ति । तेषां विषयेऽपि सः अत्याकर्षकतया काव्यं रचयितुं समर्थः । तस्य प्रमाणत्वेन एतत् काव्यद्वयं परिशीलयितुं शक्यते –

5. दर्पणदशकम्

दर्पणस्तु संसारिणामुपयुक्तपदार्थेषु अतीव मुख्यभूतः । तत्सन्निधानबलादेव गृहेषु कान्तिलक्ष्मीः भाति । अत एव दर्पणस्य स्थानं पुष्पाक्षतचन्दनादीनां माङ्गल्यवस्तूनां यथा तथा श्रेष्ठं भवति । दर्पणस्य पुरतः स्थिताः जनाः किं किं कुर्वन्ति इति कविना सम्यगवलोकितमस्ति । तदेव इत्थं लिखति सः –

त्वत्सन्निधिं प्राप्य जनास्समस्ताः सुरूपिणो वाथ कुरूपिणो वा ।
मुहुर्मुहुश्चोत्सुकिनः स्वरूपं पश्यन्ति हृष्यन्ति च निर्विशेषम् ॥3॥

दर्पणः पुरुषाणामपेक्षया महिलानामेव प्रियतमः –

पुरुषेभ्योऽप्यधिकतरं मुकुर त्वं प्रियतमोऽसि वनितानाम् ।
यस्मात् त्वत्पुरतोऽमूः विलासविकसितमुखाम्बुजा भान्ति ॥5॥

अतः एव ताः दर्पणस्य पुरतः विलासेन विकसितमुखकमलाः भवन्ति !

दर्पणः सर्वेषामपि रूपं यथावत् दर्शयति इत्यतः तस्य मनसि स्वविषये दर्पः स्यादिति चिन्तयन् कविः वदति –

भो दर्पण त्वमतिदर्पभरं बिभर्षि
कन्दर्पसुन्दरजनांश्च कुरूपिणश्च ।
सन्दर्शयामि हि यथावदितीह वेत्सि
सर्वास्तु दर्शयसि तद्विपरीतवृत्त्या ॥8॥

'अहं सुन्दरजनान् कुरूपिणश्च यथावत् दर्शयामि' इति मा चिन्तय । यतः सर्वमपि यथावदेव दर्शयितुं न शक्नोषि । विपरीतवृत्त्या केवलं दर्शयसि ! (दर्पणे यः प्रतिबिम्बः दृश्यते तत्र बिम्बस्य वामभागः दक्षिणभागत्वेन, दक्षिणभागः वामभागत्वेन च दृश्यते ।)

इत्थं च लघुकाव्येऽस्मिन् कविः दशभिरेव श्लाकैः दर्पणस्य गुणान् दोषान् च सम्यगेव वर्णितवानस्ति । 'गुणदोषौ सकलेष्वपि वस्तुषु भवतः एव । तत् वक्तुमेव मम एषः प्रयत्नः इति अन्तिमे श्लोके तेन निवेदितमपि ।

6. संमार्जनीस्तुतिः

संमार्जनी सर्वेषामपि गृहेषु उपयुज्यमानः कश्चन पदार्थः । प्रायः शिङ्गरार्यः एव तादृशः प्रथमः संस्कृतकविः यः तामधिकृत्यापि काव्यं विरचितवान् । अष्टाविंशत्या श्लोकैः उपेता एषा संमार्जनीस्तुतिः अतीव हृद्या मनोहारिणी चास्ति ।

कविः जानाति यत् संमार्जनी लोकोपकारिणीति । परं केचन तामुपेक्षन्ते इति तु सत्यमेव । तथापि तेऽपि यदा स्वगृहं धूलिधूसरितं भवति तदा तस्य स्वच्छतायै संमार्जनीम् अवलम्बन्ते एव ।

संमार्जनि ! त्वां भुवनोपकर्त्रीम्नादरात् केऽप्यवधीरयन्तु ।
गृहाङ्गणे धूलिकणावृते त्वां सम्भावयन्त्येव जनास्त एव ॥1॥

एषा संमार्जनी कुत्र कुत्र भवति इति कविः लिखति –

राज्ञां गृहे देवगृहे च गोष्ठे महानसे पर्णगृहे मठे वा ।
नृणां निवासार्हसमस्तदेशे व्याप्तिस्तवास्ते त्वमतोऽसि पूज्या ॥3॥

राजभवने, देवगृहे, गोष्ठे, पाकशालायां, पर्णकुटीरे, मठे वा मनुष्यनिवासयोग्येषु सर्वेषु अपि स्थानेषु संमार्जन्याः व्याप्तिः अस्ति एव । तत्प्रवेशानर्हः मनुष्यवासयोग्यः प्रदेशः कोऽपि नास्ति । अतः एव सा पूज्या अस्ति । शुद्धाशुद्धभेदं विना संमार्जनी सर्वमपि स्थानं समानरीत्या सेवते । अरण्ये पर्वताग्रे वा जातत्वात् सा स्वयमेव निसर्गपूता । अतः

एव गृहशुद्धिकार्ये सा उपयुज्यते । विवाहब्रह्मोपदेशादिकार्यक्रमेषु जनानामागमनात् पूर्वमेव गृहजनाः तत्साहाय्येन स्थलशुद्धिं विरचयन्ति ।

शुद्धीकरणकार्यात् अन्यत्र कुत्र कुत्र संमार्जन्याः उपयोगः जनैः क्रियते इति कविना सम्यक् अवलोकितम् अस्ति । अतः एव सः लिखति –

बाल्ये शिशूनां यदि दृष्टिदोषस्स्याद्वा तदानीं तव देहकाण्डे ।
किञ्चित् गृहीत्वाग्निशिखाप्रदीप्तं नीराजयन्त्याशु च दोषशान्त्यै ॥7॥

बाल्यकाले शिशूनां यदि दृष्टिदोषः सम्भवति तर्हि संमार्जन्याः कञ्चित् भागमुत्पाट्य, तमग्निना प्रज्वाल्य शिशोः नीराजनं कुर्वन्ति । तेन दोषशान्तिर्जाता इति जनाः भावयन्ति । संमार्जन्याः दर्शनात् भूतपिशाचादयोऽपि भीत्या पलायन्ते इति तेषां विश्वासः ।

त्वां सूतिकागेहसमीपदेशे दूतीमिवाचारविदो निवेश्य ।
अर्चन्ति धूपश्शिशुरक्षणार्थं तव प्रभावस्सुमहान् चकास्ति ॥9॥

कुत्रचित् सूतिकागृहस्य समीपे दूतीमिव संमार्जनीं निवेश्य धूपादिभिः ताम् अर्चन्ति । संमार्जनी नवजातशिशोः रक्षणं करिष्यति इति विश्वासः तथा कुर्वतां जनानाम् ।

संमार्जनी जनान् कं गुणं बोधयति इति कविः वदति –

नैसर्गिकं ते सदृढैकमत्यं स्वजातिसंश्लेषपरासि तस्मात् ।
तं सद्गुणं बोधयितुं पदार्थानेकीकरोष्याशु भुवि प्रकीर्णान् ॥10॥

संमार्जनी नाम समानानां नारिकेलपत्रशकलादीनां (समानाकारकाणां तृणविशेषाणां वा) संहतिः खलु ? तन्नाम संमार्जनी सर्वदा अपि स्वजातिसंश्लेषपरा भवति । स्वजातीयवस्तूनां पदार्थानां वा नित्यसंहतिं सा बोधयति । 'मनुष्यजातीयाः सर्वेऽपिं वयं ऐकमत्येन भवेम' इत्याशयं संमार्जनी स्मारयति । संमार्जन्याः कार्यमपि भूमौ सर्वत्र प्रकीर्णानाम् अवकरादीनाम् एकत्रीकरणम् । तदपि कार्यं संमार्जनी 'ऐकमत्यरूपः सद्गुणः जनेषु अपि भवतु' इति बोधयितुमेव करोति इति कवेः आशयः ।

धान्यानां परिमार्जनप्रकरणे संमार्जनी अग्निदग्धे भाण्डे निहिता सती महान्तं तापम् अनुभवति । तस्याः अवयवानां तु उपयोगः बहु अधिकः । यथा –

दीपप्रज्ज्वलनाय किञ्च तिलकं वक्त्रे निवेष्टुं तथा
कर्तुं भोजनपत्रसीवनमथो दन्तस्य निर्घर्षणम् ।
कर्तुं भेषजलेपनं रचयितुं संमार्जनि प्रायशः
त्वद्गात्रावयवः प्रयोजनकरः लोकस्य नानाविधैः ॥13॥

दीपप्रज्वालनार्थं केचन संमार्जन्याः शलाकाम् उपयुञ्जते । महिलाः ललाटे तिलकं

रचयितुं ताम् उपयुञ्जते । भोजनपत्राणां निर्माणावसरे पलाशपत्राणां परस्परसीवनार्थं संमार्जन्याः अवयवाः एव उपयुज्यन्ते । केचन दन्तनिर्घर्षणार्थम्, औषधलेपनार्थं च उपयुज्यन्ते । एवं तस्य विविधः उपयोगः भवति ।

यद्यपि संमार्जन्याः बहवः पादाः भवन्ति तथापि सा स्वयं सञ्चारितुम् असमर्था । लघुबालिका इव अन्यैः गृहीता चेदेव सा अटितुं शक्नोति इति कविः श्लोकेऽस्मिन् वर्णयति –

अनेकपादप्रकरावृतापि गृहस्य कोणे क्वचिदेव लीना ।
अन्यैर्गृहीता च करेण भूम्यां सञ्चारितैवाटसि बालिकेव ॥16॥

अत्र दत्तं बालिकायाः उपमानम् अतीव हृद्यं सत् तद्वत् अन्यस्य हस्तस्य साहाय्येन गृहे सञ्चरन्त्याः संमार्जन्याः चित्रं सहृदयानां पुरतः उपस्थापयति ।

संमार्जनीं सचेतनां परिगणयन् कविः मनुष्यव्यवहारेण तस्याः व्यवहारं तुलयन् अग्रिमं श्लोकं लिखति –

नान्ने तवेच्छा न च वाससीच्छा शय्यासु नेच्छा न च भूषणेच्छा ।
परं त्ववश्यं बत वाञ्छसि त्वं निरन्तरं तत्कटिसूत्रमेकम् ॥17॥

संमार्जनी वस्तुतः विरक्ता । परं सा एकमाभरणं तु निरन्तरं धर्तुमिच्छति । तच्चास्ति कटिसूत्रम् ! संमार्जन्यां तदवयवभूतानां शलाकानाम् तृणविशेषाणां वा एकत्रीकृत्य बन्धनार्थम् उपयज्यमाना रज्जुः कविना कटिसूत्रत्वेन वर्णिता । तादृशीं रज्जुं विना संमार्जनी नैव तिष्ठति इत्यतः तस्याः 'कटिसूत्रवाञ्छा' औचित्यपूर्णा एव ।

जनाः धान्यकणान् अवकरान् वा प्रथमं संमार्जन्याः साहाय्येन एकत्रीकुर्वन्ति । ततश्च तान् शूर्पे पूरयन्ति । एतद् दृष्टवतः कवेः कल्पना एवं विजृम्भते –

शूर्पः पतिस्तेऽतिपतिव्रतासि संमार्जनि त्वं भुवि सञ्चरन्ती ।
सम्पादितं सर्वमपि प्रियाय प्रयच्छसि स्वार्थमपास्य हन्त ॥19॥

संमार्जनी काचित् महापतिव्रता । शूर्पः तस्याः पतिः । यथा पत्नी स्वेन सम्पादितं सर्वमपि भर्त्रे समर्पयति तथा संमार्जनी अपि स्वेन प्राप्तं सर्वमपि शूर्पाय समर्पयति । तस्याः स्वार्थलेशोऽपि नास्ति !

संमार्जनी सकललोकोपयोगिनी चेदपि सा सुलभक्रययोग्या । बहुविधैः लोकोपकारं करोति चेदपि तस्याः गर्वः एव नास्ति । स्वेन क्रियमाणस्य कार्यस्य निमित्तं सा कदापि किमपि प्रतिफलं नेच्छति । 'संमार्जन्याः एतादृशान् सद्गुणान् जनाः कुतो वा न स्मरन्ति' इति कवेः आश्चर्यम् ।

रीढातिरूढा भुवि ते कुतो वा गूढान् गुणौघान् तव न स्मरन्ति ।
लीढासि दोषाल्पबलेन नापि बाढं हि मूढास्त्वयि साभ्यसूयाः ॥22॥

आश्चर्यस्य विषयः एषः अस्ति यत् 'एतादृश्या गुणवत्या, उपकारपरम्परामेव कुर्वत्या अपि संमार्जन्या लोके किं प्राप्तम्' इत्युक्ते 'तस्याः दर्शनमपि अमङ्गलकरम्' इति कुख्यातिरेव प्राप्ता इत्येतदेव ।

उपकारपरम्परां विधात्र्यास्तव सिद्धं बहुमानमेतदेव ।
तव दर्शनमप्यमङ्गलं खल्विति लोके विबुधाश्च मन्वते यत् ॥23॥

तथापि कविः तां संमार्जनीम् उद्दिश्य आश्वासनवचनानि वदति –

मुञ्च मुञ्च हृदि सञ्चितां चिरात् गर्हितास्मि सकलैरिति व्यथाम् ।
शोधिनि ! प्रकृतिसिद्धमेव तत् साधुगर्हणमिदं न नूतनम् ॥24॥

लोकस्य स्वभावः एव एषः । सत्पुरुषाणां निन्दनं तस्य नूतनं नैव । प्राचीनकालादपि सज्जनाः अत्र निन्दनपात्रणि अभवन् एव । 'प्रकृतिसिद्धमेव तत् साधुगर्हणमिदं न नूतनम्' इति सामान्येन वचनेन जनैः क्रियमाणस्य संमार्जनीनिन्दनस्य समर्थनं कुर्वता कविना अत्र अर्थान्तरन्यासालङ्कारः सम्यक् प्रयुक्तः अस्ति ।

काव्यस्यास्य अन्तिमे भागे कविः जनान् उद्दिश्य एवं वदति –

संमार्जन्यास्सद्गुणान् श्लाघनीयान्
अभ्यस्यन्तु स्वार्थनिष्ठा मनुष्याः ।
अन्तर्यामी चित्यचित्यप्यजस्रं
यः सश्रीशः साधुतां निश्चिनोतु ॥26॥

इत्थं संमार्जन्याः सकलान् अपि गुणान् मनसि आकलय्य अन्ते कविः वदति –

श्री श्रीनिवाससदने सदने सदाहम् ।
संमार्जनी यदि भवामि तदास्मि धन्यः ॥23॥

शिङ्गरार्यस्य श्रीनिवासभक्तिः अपि अत्र प्रकाशिता भवति ।

'संमार्जनीस्तुत्याः पठनस्य अधिकारिणः के ? अनधिकारिणश्च के ?' इति कविः अन्तिमश्लोके एवं सूचयति –

येषां वा सदनेषु नास्ति सुचिरादेकापि संमार्जनी
तेऽमी नैव पठन्तु मन्दमतयः रम्यामिमां तत्स्तुतिम् ।
ये त्वन्ये स्वगृहेषु सत्कृतमहासंमार्जनीसम्पदः
ते सर्वे सुहृदः पठन्तु रसिकाः स्तुत्यामिमां नित्यशः ॥28॥

कविः जानात्येव यत् सर्वेषां गृहेष्वपि एका वा संमार्जनी भवत्येवेति । अतः 'सर्वेऽपि जनाः काव्यमिदमवश्यं पठन्तु' इति स्वाभिप्रायोऽपि तेनात्र सूच्यरूपेण प्रकाशितोऽस्ति ।

इत्थं च शिङ्गरार्यविरचिता इयं संमार्जनीस्तुतिः अनेकैः गुणैः उपेता सती, जडानां वस्तूनां विषयेऽपि कीदृशं सरसं काव्यं रचयितुं शक्यते प्रतिभावता कविना इत्यस्य उदाहरणरूपेण विराजते ।

द्वितीयः भागः

स्तोत्रकाव्यानि

शिङ्गरार्यः विशेषतया भक्तः कविः । अतः एव तेन रचिते साहित्ये भूयान् भागः भगवतः स्तुतिविषयकः एव । यद्यपि सः विशिष्टाद्वैतमतावलम्बी, श्रीरामानुज-सम्प्रदायानुसारी, तथापि सः सर्वानपि देवानधिकृत्य स्तोत्राणि रचितवानस्ति । 'एको देवः नाम विभिन्नम्' इति वचसि तस्य महान् विश्वासः आसीदिति भासते । अतः सः एकमेव देवं भिन्नैः भिन्नैः रूपैः पश्यन्, भिन्नभिन्नप्रकारेण स्तुतवानस्ति । तेन लिखितानि सर्वाण्यपि स्तोत्राणि 'काव्यकलापः – प्रथमः भागः', 'काव्यकलापः – द्वितीयः भागः' इत्यत्र सङ्गृहीतानि सन्ति । तत्र कानिचित् स्तोत्राणि अत्यन्तं संक्षिप्तानि, पुनः कानिचित् दीर्घाण्यपि सन्ति ।

केषाञ्चित् स्तोत्राणामीषत्परिचयः अत्र प्रस्तूयते, तत्रत्यानां विशेषांशानां सङ्ग्रहश्च क्रियते, येन शिङ्गरार्यविरचितस्य स्तोत्रसाहित्यस्य काचित् स्थूला कल्पना लभ्येत ।

1. श्रीबालकृष्णस्तुतिः –

भगवतः श्रीकृष्णस्य विषयकाणां पद्यानां संग्रहः एषः । अत्र प्रथमः श्लोकः एव अत्यन्तं मनोहरः अस्ति ।

अम्बेतिगम्भीरगिरायशोदासम्बोधकः कुम्भदधिप्रलेपात् ।
जम्बालिताङ्गोऽम्बरवर्जितोऽस्मान् बिम्बाधरः पातु सदाम्बुजाक्षः ॥1॥

बालकृष्णः 'अम्ब' इति गम्भीरया गिरा मातरं यशोदाम् आह्वयति । दधिलेपात् तस्य शरीरं पङ्किलं जातमस्ति । अधृतवस्त्रः अस्ति सः । बिम्बाधरः अम्बुजाक्षश्च सः अस्मान् पातु इति कविः प्रार्थयते ।

अत्रत्यानि सर्वाण्यपि पद्यानि हृद्यानि, शब्दालङ्कारयुतानि च सन्ति । एतानि द्वित्राणि तत्र उदाहरणानि –

स्वर्गापवर्गास्पदमार्गदर्शी भर्गादिभिर्गीतनिसर्गभूमा ।
सुदुर्ग्रहानर्घगुणोऽर्गलं स्यात् दुर्गाग्रजोऽग्रे मम दुर्गुणानाम् ।।6।।
वन्दारुवृन्दारकवृन्दसान्द्रवृन्दावनं दारितदानवेन्द्रम् ।
वन्दे तमिन्दीवरसुन्दराभं मन्दस्मितं नन्दसुतं मुकुन्दम् ।।7।।
सुरासुराराधितचारुपादसरोरुहं सूरिवरैरुपेतम् ।
धराधराधारकरारविन्दं परावरं शौरिमहं स्मरामि ।।8।।

एतेषु त्रिषु अपि पद्येषु समानानाम् वर्णानां पुनःपुनः प्रयोगः कविना कृतः अस्ति । तादृशः प्रयोगः कविना अतीव चमत्कारितया कृतः अस्ति; यतः तेन अर्थविषयेऽपि किञ्चिदपि क्लेशः नानुभूयते वाचकैः ।

अन्तिमे च पद्ये कविः लिखति यत् 'सन्तः मया विरचिताम् एतां बालकृष्णस्तुतिं कण्ठभूषां कुर्वन्तु' इति । सम्यक् परिशील्यमाने सति निश्चयेनापि एतस्य स्तोत्रस्य केचन श्लोकास्तु अवश्यं कण्ठे धारणयोग्याः सन्ति एव इति भासते ।

2. अर्चाच्युतार्चनम् –

द्विचत्वारिंशता पद्यैः उपेतं स्तोत्रमिदम् । अच्युतस्य आकृतिमेव मनसि निधाय लिखितानि सन्ति एतानि पद्यानि । एषु कानिचित् पद्यानि अत्यन्तं रमणीयानि सन्ति । कविकल्पनापि तत्र तत्र पाठकान् अवश्यं विस्माययति । द्वित्राणि उदाहरणानि यथा –

सामान्यतः भक्ताः गृहेषु भगवतः मूर्तिं कस्याञ्चित् पेटिकायां निक्षिपन्ति । प्रतिदिनं तां पूजयित्वा अनन्तरं पेटिकायाः पिधानं कुर्वन्ति । तद्विषये कविः इत्थं वदति –

कारागृहे त्वमुदभूः किल वासुदेव
तत्ते सदा स्मृतिपथेऽस्त्विति मन्यमानाः ।
त्वां दभ्रसद्मनि निगूह्य पिदध्महे च
मन्तोः खलूचितमिदं श्रयतस्तवास्मान् ।।6।।

भगवान् कृष्णस्तु कारागृहे एव जातः । सः कारागृहवासः तेन कदापि विस्मृतः मा भूत् इति जनाः वयम् अपेक्षामहे । अतः एव इदानीमपि प्रतिदिनं भवतः कारागृह–वासव्यवस्थां वयम् एवं कल्पयामः । एतत्तु उचितमेव इति कवेः अभिप्रायः ।

पूजासन्दर्भे अर्घ्यं, पाद्यम्, आचमनीयं च दीयते भगवते । अयं कविरपि तदेव करोति । परम् एषः तत्र किञ्चित् वैशिष्ट्यम् अभिजानाति । सः चिन्तयति – यः भगवान् प्रलयकाले एकः एव जले आसीत्, यस्य च पदारविन्दादेव गङ्गानदी एव

उत्पन्ना तस्मै भगवते अहं दर्व्या जलकणैः अर्घ्यं, पाद्यम्, आचमनीयं च ददामि इति । तन्नाम 'यः देवः कदापि जलाभावं नाभिजानाति यश्च जलस्य भूरि सम्पर्के एव तिष्ठति तस्मै देवाय अहं जलं समर्पयामि ! तदपि दर्व्या' इति ।

एवमेव वस्त्रविषयेऽपि सः वदति –

पीताम्बराणि यदि वाञ्छसि पीतवासः
नाहं प्रदातुमिह तेऽस्मि हरे समर्थः ।
यो दीयते धर तमेव पटं प्रहृष्टः
चीरं पुरा हि धृतवानसि राघवस्त्वम् ॥12॥

'अहं तुभ्यमतीवसाधारणं वस्त्रं दातुं शक्नुयाम् । तदेव प्रीत्या स्वीकुरु । त्वं साधारणेन वस्त्रेणापि सन्तुष्टो भवसीति जानामि । यतः रामावतारे अरण्यवासावसरे वल्कलमेव खलु धृतवानासीः ?'

सामान्यतः भक्ताः भगवतः षोडशोपचारपूजां कुर्वन्ति । तत्र सर्वविधपूजाद्रव्याणि न लब्धानि चेदपि कानिचिद् वा समर्प्य, मन्त्राक्षतानां जलस्य वा समर्पणेन सर्वमपि समर्पितम् इति चिन्तयन्ति । अयं तु कविः भगवते किञ्चिदपि दातुं न समर्थः । परं सः तत्रापि स्वकीयं चातुर्यम् एवं प्रदर्शयति – 'भगवतः तेषां वस्तूनाम् आवश्यकतैव नास्ति' इति सः निरूपयति । तद्विषये द्वित्राणि मनोहराणि उदाहरणानि एवं सन्ति –

छत्रं च चामरमहं तव पूजनार्थं
संगृह्य वेश्मनि निवेशयितुं न शक्तः ।
गोरक्षणार्थमटवीमटतस्तवैते
को वा ददाविह गृहान्तरम् कुतस्ते ॥16॥

'पूजानिमित्तं छत्रचामरादिकं तु अहं नानीतवान् । वस्तुतः तेषामावश्यकतैव भवतः नास्ति । यतः कृष्णावतारे गोपालबालः सन् भवान् नित्यमरण्ये सञ्चरति स्म । तादृशस्य बहिः अटनशीलस्य भवतः छत्रेण चामरेण वा किम् ?'

अन्येभ्यो बहुधा प्रदर्श्य भगवन् ! त्वं विश्वरूपं पुरा
तानत्रासय एव किं तु न भवानालोकयत्तत्स्वयम् ।
आदर्शं यदि दर्शयामि भवते तद्विश्वरूपं पुनः
धृत्वालोक्य बिभेषि भोः ! त्वमपि तन्मास्त्वेव ते दर्पणम् ॥17॥

भगवान् कृष्णः पूर्वं बहुवारं पार्थयशोदादिभ्यः स्वकीयं विश्वरूपं दर्शितवान् खलु ? तदेव स्मरन् कविः वदति – 'भवान् अन्येभ्यः विश्वरूपं प्रदर्श्य तान् भीतान् कृतवान् ।

परन्तु भयङ्करं तत् विश्वरूपं स्वयं कदापि न दृष्टवानेव । इदानीं यद्यहं दर्पणं दर्शयामि तर्हि तद्दर्शनेन भवान् स्वयमेव भीतो भविष्यति । अतः अहं भवते दर्पणं न दर्शयामि !’

स्वकीयमसामर्थ्यमपि कविः कथमत्र चमत्कारितया वर्णितवान् इत्येतत् अवश्यं मननीयम् ।

लोके भक्तैः देवाय नैवेद्यादिकं समर्प्यते । भगवान् तत् स्वीकरिष्यति इति तेषां विश्वासः । परं भगवान् प्रत्यक्षीभूय स्वयं यदि तत् स्वीकुर्यात् तर्हि ते पुनः किमपि देवाय समर्पयन्ति वा इति कवेः संशयः अस्ति । अतः सः इत्थं वदति –

भक्ष्यं च भोज्यमपि ते पुरतस्समर्प्य
भुङ्क्ष्वेति वच्मि च तथापि दृशैव पश्यन् ।
तृप्तो भवाथ यदि भोक्तुमपि प्रवृत्तः
पश्चान्न तत्तव दृशोरपि दर्शयामि ॥20॥

आत्मीये भगवति भक्तस्य महत् स्वाच्छन्द्यम् । अतोऽत्र कविः भगवन्तमेवं वदति –

युद्धे कौरवपाण्डवैर्विरचिते भीष्मं च कर्णं तथा
द्रोणं हन्तुमधर्मपूर्णमकरोः कर्मादभुतं निर्भयः ।
तत्प्रष्टा न तदाभवत्किमुचितं धर्मस्वरूपस्य ते
मद्गेहे त्वधर्मकर्म कुरुषे चेद्दण्डपात्रं भवेः ॥25॥

‘भोः देव ! कृष्णावतारकाले भीष्मं, द्रोणं, कर्णं च मारयितुं भवान् अधर्मपूर्णं कार्यं कृतवान् । तदा तु भवतः प्रष्टा कोऽपि न आसीत् । मम गृहे तिष्ठन् भवान् यदि तादृशम् अधर्माचरणं करोति तर्हि निश्चयेनापि दण्डनपात्रं भवति !’

बध्वाञ्जलिं भुवि निपत्य च दण्डवत्त्वां
याचे मुहुः किमपि कर्तुमशक्त एषः ।
मां पाहि मुञ्चसि रुषा यदि दुष्कृतीति
स्वामिंस्तदा भवति ते करुणा हि वन्ध्या ॥38॥

‘अहं पुनःपुनः भवन्तं प्रणमामि, प्रार्थये च । यतः तद्विना अहं किमपि कर्तुम् अशक्तः । भवता अहं रक्षणीयः एव । यदि याचन्तमपि मां न रक्षति तर्हि ‘भवतः करुणा वन्ध्या’ इति अपकीर्तिरिव भवति’ इति ।

‘हे भगवन् ! भवान् दशावतारी अस्ति’ इति वर्णयत् एतत् पद्यं दशावताराणां स्मरणे अतीव साहाय्यकम् अस्ति –

मत्स्योऽसि कूर्मोऽसि तथासि कोलो
विष्णो ! नृसिंहोऽसि च वामनोऽसि ।
कुठाररामोऽसि रघूत्तमोऽसि
बलोऽसि कृष्णोऽसि च कल्क्यसि त्वम् ॥39॥

एवं च 'अर्चाच्युतार्चन'नामकं स्तोत्रमिदम् अतीव मधुरं, मनोहरं, चित्ताकर्षकं च अस्ति ।

16. भज लक्ष्मीशस्तवः –

शङ्कराचार्यविरचितस्य 'भज गोविन्द'स्तोत्रस्य शैल्या शिङ्गरार्येण लिखितोऽस्ति एषः भजलक्ष्मीशस्तवः । 'भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते' इति आचार्यैः लिखितम् । अयं तु 'भज लक्ष्मीशं भज लक्ष्मीशं लक्ष्मीशं भज चपलमते' इति लिखति ।

कमलाकान्तः अनन्तः दयापूर्णः अस्ति । सः वृजिनभयात् त्वां रक्षति । यतः विष्णुः कदापि भक्तान् न त्यजति ।

मूढ ! भज त्वं कमलाकान्तं सदयमनन्तं व्रज भगवन्तम् ।
वृजिनभयात्त्वां रक्षति शौरिस्त्यजति न भक्तान् जातु मुरारिः ॥3॥
भज लक्ष्मीशं भज लक्ष्मीशं लक्ष्मीशं भज चपलमते ।

मनुष्यस्य स्वभावं कविः सम्यक् जानाति । अतः सः अग्रे लिखति –

भार्यासेवाकार्यासक्तो मातापित्रोर्भरणविरक्तः ।
नैव विमुञ्चसि वनितामोहं विषयविषाब्धौ गाहं गाहम् ॥5॥ इति ।

मनुष्यः पत्नीसेवायामेव सक्तः भवति । तस्याः वशीभूतः सन् मातापित्रोः योगक्षेममपि सः न पश्यति । वनिताविमोहं तु न विमुञ्चति एव । विषयरूपविषपूरिते भवसमुद्रे निमज्जन् सः सर्वमपि विस्मरति । तं कविः जागरयति इत्थम् –

वनिताधनतनुपोषणमात्रं मनुषे ननु निजकर्म पवित्रम् ।
यमभटदर्शनविषमे समये वद तदखिलमपि रक्षति किमये ॥6॥

'सम्प्राप्ते सन्निहिते काले न हि न हि रक्षति डु कृञ् करणे' इति शङ्कराचार्याणां पङ्क्तिम् अनुकुर्वन्निव शिङ्गरार्यः पद्यमिदं रचितवानस्ति । तस्याः पङ्क्तेः 'यमभटदर्शन–विषमे समये वद तदखिलमपि रक्षति किमये' इत्यस्याः च साम्यं सहृदयैः वेद्यते एव ।

भिन्नघटादिव सलिलं भरितं गलति किलायुस्सततं त्वरितम् ।
गतसमयस्सतु गतो ह्यनर्घः न तु विचितो निश्रेयसमार्गः ॥9॥

अत्र तु भर्तृहरेः नीतिशतकस्य 'आयुः परिस्रवति भिन्नघटादिवाम्भः' इत्यस्य वाक्यस्य साक्षात् प्रभावः दृश्यते ।

स्तोत्रकाव्येऽप्यस्मिन् आधुनिकस्यापि विषयस्य स्पर्शं करोति शिङ्गरार्यः । तद्यथा –

विद्युतविज्ञानबलात् धैर्यं प्राप्य करोषि सदाद्भुतकार्यम् ।
तमखिलमिह भुवि देहसुखार्थं मोक्षपथे तत्सकलं व्यर्थम् ॥17॥

मानवः विज्ञानस्य साहाय्यात् अनेकानि अद्भुतकार्याणि करोति । तत्सर्वमपि सः देहसुखार्थं करोति । परं कविः स्मारयति – 'मोक्षपथे तत्सकलं व्यर्थम्' इति । अतः तन्निमित्तं तु भगवतः लक्ष्मीशस्यैव भजनं कर्तव्यमिति तस्याशयः ।

पुण्यक्षेत्रसञ्चारः, पुण्यनदीषु स्नानं, नारायणचरणाराधनं च क्रियते चेत् भवचक्रात् विमुक्तिः भविष्यति इति तस्य अभिप्रायः ।

सञ्चर पुण्यक्षेत्रस्थानं कुरु गङ्गादिनदीषु स्नानम् ।
कुरु नारायणचरणध्यानं न पुनर्जन्ममवाप्स्यसि नूनम् ॥19॥

हयग्रीवस्तुतिः

भगवान् हयग्रीवः विष्णोरेव अवतारभूतः । हयस्य ग्रीवा इव तदा तस्य ग्रीवा आसीत् । तस्य हयसम्बन्धं विशेषतया परिगणयता कविना शिङ्गरार्येण हयवाचकाः ये शब्दाः सन्ति ते शब्दाः यथा अन्तर्गताः भवेयुः तथा पद्यानि अत्र विरचितानि । अमरकोषे अश्ववाचकाः शब्दाः एवं सन्ति –

घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥810॥ (अमरकोषे क्षत्रियवर्गे)

तत्र श्लोकस्य उत्तरार्धे उक्तैः सर्वैरपि शब्दैः हरेः स्तवनं कृत्वा अन्ते कविः लिखति –

विदुषामरसिंहेन नामलिङ्गानुशासने ।
हयपर्यायशब्दा ये कृतास्तैस्संस्तुतो हरिः ॥ इति ।

तत्र 'वाजिवदनो ज्ञानप्रदो राजते; महता वाहेन भवता मम देहमोहः व्यपगतः; सैन्धवकन्धर ! त्वं यं वीक्षसे सः अद्भुतवाक् भूत्वा चकास्ति; सप्तिवक्त्रः, त्वं सुधांशोरपि बिम्बमध्ये अम्बुजे तिष्ठसि' – इत्येवं प्रकारेण ते सर्वे शब्दाः तेन प्रयुक्ताः सन्ति । (परं अमरकोषोक्तैः सवैरपि हयपर्यायशब्दैः हरिस्तवनं न कृतं कविना ।)

अत्रत्याः 'अङ्कस्थानमलङ्कृतं च सततं पङ्केरुहावासया' इत्यादयः प्रयोगाः अतीव मनोहराः सन्ति ।

15. ततः किं पद्यानि –

शङ्करभगवत्पादैः विरचितानि 'ततः किं पद्यनि' दृष्ट्वा तया एव शैल्या शिङ्गरार्येण एतानि पद्यानि विरचितानि सन्ति। तत्र इव अत्रापि प्रतिपद्यम् अन्तिमे पादे 'ततः किं ततः किं ततः किं ततः किम् ?' इत्येषा पङ्क्तिरेव पुनरावर्तते।

कविः वदति – 'जगति सुखत्वेन यद् यद् वर्ण्यते तद् सर्वमपि मया अनुभूतम्। दर्शन–श्रवण–भक्षण–स्पर्शनादिषु विषयेषु इन्द्रियसुखं सर्वथा प्राप्तमेव। तथापि मया तृप्तिः नानुभूता। इदानीं प्रश्नः उदेति 'ततः किं ततः किम् ?' इति।

निरस्ताश्च वादे कुवादास्ततः किं
कृतं काव्यजातं मनोज्ञं ततः किम्।
सुपात्रेषु दत्तं च वित्तं ततः किं
सुहृद्बन्धुवर्गोऽनुनीतः ततः किम् ॥4॥

वादेषु मया कुवादाः निरस्ताः कृताः। काव्यरचनम् अपि मया कृतम्। सत्पात्रेभ्यः दानमपि कृतम्। बन्धुवर्गः अपि मया सन्तोषितः। तथापि प्रश्नः अस्ति 'ततःकिम्' ?

पण्डितसभासु कीर्तिः प्राप्ता। राजसम्माननं च प्राप्तम्। नृत्तगीतादिभिः मनः तोषितम्। ततः किम् ? अङ्गनालिङ्गनादिसुखमपि प्राप्तम्। मम शत्रुः तु न कोऽपि अस्ति। शरीरे व्याधयोऽपि न सन्ति। एवं सत्यपि 'ततःकिम् ?' इति प्रश्नः अस्त्येव।

कविः चिन्तयति – यद्यपि सर्वविधान्यपि सुखानि प्राप्तानि, तथापि काङ्क्षा शान्ता न भवति। अलब्धेषु अन्येषु वस्तुषु अपेक्षा भवति एव, यतः चञ्चलं मम मनः दुराशा–पिशाचाभिभूतम् अस्ति। परं स्थिरश्रेयसः निमित्त मुकुन्दध्यानमेव शरणम् इति सः जानाति। अतः सः मनः उद्दिश्य वदति – 'अब्जाक्ष विष्णु स्मर' इति।

मनश्चञ्चलं चाप्यदम्यं दुराशा–
पिशाचाभिभूतं महामोहमग्नम्।
स्थिरश्रेयसे तत्स्मराब्जाक्षमीड्यं
ततः किं ततः किं ततः किं ततः किम् ॥9॥

अन्ते च कविः इत्थम् उपदिशति – हरेः कीर्तनं, तदीयमर्चनं चेत्येतद्द्वयमेव यशःप्रापकम्, सर्वसम्पत्करं, शुभोदर्कं च। अतः सर्वप्रकारेणापि हरेः आराधनं कर्तव्यम्। सः अवश्यं रक्षति इति। एषा तस्य निश्चिता मतिः।

यशःप्रापकं सर्वसम्पत्प्रदं भो–
श्शुभोदर्कमेतद्द्वयं तत् शृणु त्वम्।

हरेः कीर्तनं यत्तदीयार्चनं यत्
ततः किं ततः किं ततः किं ततः किम् ॥13॥ इति ।

18. श्रीकृष्णस्य सर्वोत्कृष्टत्वम् –

स्तोत्रमिदं किञ्चित् वैशिष्ट्यपूर्णं वर्तते, यतः अत्र आरम्भे निबद्धानि नव अपि पद्यानि नञ्समासघटितैः पदैः उपेतानि, क्रियापदरहितानि च दृश्यन्ते । यथा –

असर्पभोगशयनैः असर्वामरपूजितैः ।
अकारुण्यार्णवस्वान्तैः अगूढपरतागुणैः ॥1॥

'एवं सति एतेषां शब्दानाम् अन्वयः कुत्र ?' इति शङ्का दशमश्लोकपर्यन्तमपि पाठकान् बाधते एव । तत्र तु –

अजगद्रक्षणासक्तिदशाकृतिपरिग्रहैः ।
अलसैरसमर्थैस्तैरलं देवैस्तु नः परैः ॥10॥

इति लिखितम् अस्ति । अतः एतेषां सर्वेषामपि पदानां तत्र अन्वयः इति ज्ञायते । तत्रापि कविः भगवता कृष्णेन कृतानि सर्वाणि अपि कार्यजातानि वर्णयित्वा, नञ्–घटितपदैः 'तद्भिन्नाः ये देवाः सन्ति तैः अलम्' इत्यभिप्रायं सूचयति । यथा – 'जगद्रक्षणासक्तिदशाकृतिपरिग्रहः' श्रीकृष्णः । (जगतः रक्षणासक्त्या सः दशाकृतीः परिगृहीतवान् ।) न जगद्रक्षणासक्ति – दशाकृतिपरिग्रहाः अजगद्रक्षणासक्तिदशाकृति–परिग्रहाः देवेन्द्रादयः अन्ये सर्वे देवाः । (बहुव्रीहिः समासः) असमर्थैः तैः देवैः अलम् इति तात्पर्यार्थः । अतीव चमत्कारपूर्णम् अस्ति इद वर्णनम् ।

स्तोत्रस्यास्य एकादशः श्लोकस्तु नितरां रमणीयः अस्ति । शौरिः गोवर्धनोद्धरणे कथं समर्थः जातः इति चेत् कविः एवम् अभिप्रैति –

शौरे चिराल्लिकुचदाडिमनारिकेल–
कुम्भाद्रिभारवनितौघकुचान् प्रयत्नैः ।
बिभ्रत्क्रमेण गिरिधारणलब्धशक्तिः
गोवर्धनाद्रिमवहः किमु तत्र चित्रम् ॥11॥

शौरिः क्रमेण लिकुच–दाडिम–नारिकेल–कुम्भ–अद्रि–भारयुतान् वनिताकुचौघान् भृतवान् आसीत् । अतः क्रमशः अधिकाधिकभारवहने तस्य अभ्यासः आसीदेव । तेन गोवर्धनपर्वतोद्धरणशक्तिः तस्मिन् आगता इति तु न चित्रम् !

एतदतिरिच्य शिङ्गरार्येण **श्रीशारदास्तोत्रपञ्चकम्, श्रीकृष्णप्रार्थना–**

पञ्चकम्, श्रीगोदास्तुतिपञ्चकम्, बृहत्प्रस्थपुरीश्रीनिवासदेवस्तोत्रपञ्चकम्, श्रीनृसिंहस्तुतिपञ्चकम्, श्रीरामानुजस्तोत्रम्, श्रीस्तवदशकम्, श्रीयदुशैलमधुरस्तुतिः, श्रीशाङ्घ्रिस्तुतिः, श्रीयदुगिरिनारायणमङ्गलाशासनम्, भूवराहस्तुतिः, श्रीनृसिंहस्तुतिः, श्रीनरसिंहमङ्गलाशासनम्, श्रीरामचन्द्रमङ्गलाशासनम्, श्रीपद्मावत्यष्टोत्तरशतनामावलिः, श्रीराघवेन्द्रगुरुवर्यस्तोत्रम्, पाञ्चजन्यस्तुतिपञ्चकम् – इत्यादीनि अनेकानि स्तोत्राणि रचितानि सन्ति । विस्तरभयात् ते सर्वे अत्र न विवृताः सन्ति ।

तृतीयः भागः

प्रक्षिप्तानि पद्यकाव्यानि

यद्यपि शिङ्गरार्यविरचितेषु पद्यकाव्येषु भूयान् भागः स्तोत्राणामेव दृश्यते, तथापि अन्येषामपि खण्डकाव्यानामपि कश्चन लघुः भागः तत्र अस्त्येव । वस्तुतः एतानि लघूनि काव्यानि केन शब्देन व्यपदेष्टुं योग्यानि इति निर्णये कश्चन क्लेशः अस्ति, तथापि तेषु काव्यत्वं तु अस्त्येव । चितानां केषाञ्चित् परिचयः अत्र कार्यते ।

1. शबरीभक्तिभावः –

श्रीमद्रामायणे शबर्याः यत् चित्रमस्ति तदेवात्र कविना वर्णितमस्ति । शबरकुले जातापि सा मुनीनां परिचर्याकारणतः सत्त्वगुणसम्पन्ना जाता इति कविः अभिप्रैति ।

शबरान्वयजातापि श्रमणीमुनिसंसदाम् ।
परिचर्यापरा लेभे शुद्धसत्त्वगुणं दृढम् ॥

तस्याः सद्भक्तिरूपेण पाशेन आकृष्टः सन् श्रीरामः स्वयमेव तस्याः कुटीरम् आगतवान् इति कवेः अभिप्रायः ।

रात्रिं दिवं रामपदाब्जवीक्षाकुतूहलात्तन्मयतां गतायाः ।
सद्भक्तिपाशैरिव कृष्यमाणः रामो ययौ द्राक् श्रमणीकुटीरम् ॥

स्वकुटीरम् आगतं रामं सत्कृत्य शबरी तस्मै स्वेन भुक्तोज्झितान्येव फलानि समर्प्य तस्यातिथ्यं कृतवतीति वयं जानीमः एव । तेषां फलानां महत्त्वं कविः इत्थं वर्णयति–

प्रियावियोगार्तिकृशस्य तस्य रामस्य तन्मार्गणकार्यभारे ।
चैतन्यमुत्साहयुतं शबर्याः भुक्तोज्झितान्येव ददुः फलानि ॥5॥

सीताविरहपीडितस्य श्रीरामस्य तदन्वेषणार्थम् अपेक्षितं चैतन्यं तान्येव फलानि दत्तवन्ति इति कवेराशयः। एकेनैव श्लोकेन शबर्याः जीवनस्वभावादीनां चित्रणं कविना अग्रिमश्लोके बहु सम्यक् कृतमस्ति इत्थम् –

मतङ्गपुण्याश्रमवासपूतां कृताङ्गसंशोषणजीर्णकायाम् ।
पतङ्गवंशप्रभुपादभक्तां सुतङ्गनिश्रेयसभाजमीडे ॥ इति ।

एवं च लघु अपि काव्यमिदमतीव मनोज्ञमस्ति ।

2. पूतनामा –

श्रीकृष्णं मारयितुं कंसेन प्रेषितायाः राक्षस्याः पूतनायाः विषये शिङ्गरार्यस्य महत् गौरवम्। सः तां धन्यां मन्यते। पूतनायाः वैशिष्ट्यम् एतदस्ति यत् सा कृष्णाय विषाक्तं स्तन्यं दत्तवती, तेन स्वयं तु दुर्लभम् अमृतं (मोक्षम्) प्राप्तवती। देवक्यपेक्षया पूतनायाः एव भाग्यमधिकमिति कवेः अभिप्रायः।

स्वस्तन्यं देवकी नैव ददौ कृष्णाय सूनवे ।
ततस्तस्यास्तनौ व्यर्थौ पूतनायास्तु सार्थकौ ॥

देवकी कदापि कृष्णाय स्वस्तन्यं दातुं न शक्ता। परं पूतना तत् कर्तुं शक्ता। अतः तस्याः एव स्तनौ सार्थकौ। तत्कारणात् अग्रिमे श्लोके तावेव वन्दते कविः –

पूतनायास्तनौ वन्दे भवभीतिहरौ चिरात् ।
चुम्बितौ बालकृष्णेन यौ तस्या मोक्षदायकौ ॥

अन्तिमे च श्लोके श्लेषमाश्रित्य एवं लिखति कविः –

प्रवर्तते यस्य वाचि पूतनामरता कथा ।
स पूतनामा रमते श्रीकृष्णचरिते सदा ॥

यस्य जनस्य वाचि पूतनायाः कथा विलसति, पूतनामा सः जनः (पूतं नाम यस्य सः) सर्वदा कृष्णचरिते एव रमते इति। विख्यातः विद्वान् के. एस्. नारायणाचार्यः अपि स्वेन विरचिते कस्मिंश्चित् निबन्धे शिङ्गरार्यविरचितानां पूतानविषयकाणामेतेषां पद्यानां रमणीयत्वं बहुधा श्लाघितवानस्ति इत्यपि अत्र स्मर्तुं योग्यम्।

3. श्रीपुरन्दरदासः –

दासवरेण्यस्य श्रीपुरन्दरदासस्य विषये लिखितानां षण्णां पद्यानां सङ्ग्रहरूपं काव्यमिदम्। पुरन्दरदासस्य सूक्तयः जनेषु हरिभक्तिं जनयन्ति। वेदान्ततत्त्वस्य सारभूताः ताः सर्वेषामपि मनांसि हरन्ति। मनश्शान्तिं च यच्छन्ति।

नास्तिकताबहुलेऽस्मिन् काले यदि पुरन्दरगीतानि न स्युः तर्हि जनाः पशुप्रायाः सन्तः स्वजीवनं व्यर्थं कुर्युः इति कविः चिन्तयति।

नास्तिक्याहतकालेऽस्मिन् पुरन्दरसुगीतयः।
न सन्ति चेत्पशुप्रायाः सीदन्ति स्म वृथा जनाः॥

इत्थं पुरन्दरगीतानां वैशिष्ट्यं वर्णयित्वा 'लोके सर्वेषामपि प्रख्यातानां पुरुषाणां प्रतिमाः संस्थाप्यन्ते; पुरन्दरस्य प्रतिमापि अवश्यं स्थापनीया' इति अन्तिमे पद्ये वदति कविः।

प्रख्यातपुंसां प्रतिमाः सन्त्यनेकत्र निर्मिताः।
पूज्यानामीदृशानां मूर्तिस्स्थापनीयार्यमन्दिरे॥ इति।

4. मानवमानः

मनुष्यशक्तेः काचित् सीमा अस्ति; तदतिक्रम्य सः किमपि कर्तुं न प्रभवति इत्यंशं कविः लघुकाव्येऽस्मिन् सुचारु निरूपितवानस्ति। मनुष्याः अद्य 'वयं सर्वसमर्थाः' इति चिन्तयन्ति। विज्ञानस्य प्रगतेः कारणतः ते पञ्च भूतानि स्ववशीकृत्य 'अस्माभिः असाध्यं किमपि नास्ति। अतः दैवशक्तिस्तु वृथा' इति भावयन्तः सन्ति।

अपूर्वां प्रपद्योच्चविज्ञानशक्तिं
वशीकृत्य पञ्चापि भूतानि तानि।
विचित्राणि यन्त्राणि निर्माय माया-
भ्रमाधायिकर्माणि कुर्मः प्रयत्नैः॥1॥
विशामोऽब्धिमूलं भ्रमामो ग्रहाणाम्
उपर्यन्तरिक्षे भुवोऽन्तश्चरामः।
असाध्यं नराणां न चाप्यस्ति किञ्चित्
वयं दैवशक्तिर्वृथेत्येव विद्मः॥2॥

किन्तु एवं चिन्तयतः जनान् दृष्ट्वा कविः विषादमनुभवति। तेषां कथनम् असत्यपूर्णमेव इति सः जानाति। यतः ते अतिवृष्टिम्, अनावृष्टिं, भूकम्पादिप्रकृतिजन्याः अन्याः विपदः वा वारयितुं सर्वथा न शक्ताः। सुभिक्षं सौख्यं च देशे कल्पयितुं ते सर्वथा असमर्थाः एव। अतः कविः एवं निर्णयति –

परा शक्तिरेका हरेरस्ति तस्मात् स्मरामोऽविरामं चिरं सर्वशक्तम्॥ इति।

5. नरस्स्वतन्त्रस्स्वत एव निर्घृणः –

मनुष्याणां क्रूरस्वभावं बहु सम्यक् वर्णितवानस्ति कविः एतस्मिन् काव्ये। एतेषु

दिनेषु मनुष्याः अत्यन्तं निर्दयाः सञ्जाताः। मृगपक्षिकृमिकीटादीन् सर्वानपि ते स्वार्थ-सम्पादनाय मारयन्ति इति कविः खेदमनुभवति। अतः सः लिखति –

दन्तिनं हन्ति दन्तार्थं कौशेयार्थं कृमीनपि।
पशून् मांसाय कस्तूर्यै तन्मृगान् राक्षसो नरः॥

'सर्कस्' इति कथ्यमाने इन्द्रजालादिप्रदर्शने अन्यत्र च मनुष्याः मृगान् कथं निर्दयं पीडयन्ति इत्यपि सः सम्यक् जानाति।

सिंहान् व्याघ्रान् गजानुष्ट्रान् क्रोडान् छागान् कपीन् हयान्।
कृत्वाधीनान् सनिर्बन्धं नर्तयत्यदयो नरः॥

मनुष्याणाम् अप्रयोजकं वस्तु किमपि नास्ति। परन्तु मनुष्यस्तु अन्येषां प्राणिनां निष्प्रयोजकः एव। एवं निर्दयं प्राणिपीडां कुर्वन्तः मनुष्याः व्यर्थं जीवन्ति। ये तु परदुःखं न सहन्ते, स्वकष्टमविगणय्य अन्येषां दुःखं दूरीकर्तुं यतन्ते ते एव धन्याः।

दयालवस्ते धन्या हि परदुःखासहिष्णवः।
स्वक्लेशान् ये त्वनालोच्य त्रायन्ते दुःखिनः क्षतात्॥ इति।

6. कलिकालकालः –

कलियुगस्य महिमानं, तत्कारणतः इदानीं लोके यानि वैपरीत्यानि दृश्यन्ते तानि च विडम्बनात्मकेऽस्मिन् काव्ये कविः सुष्ठु वर्णितवानस्ति। आरम्भपद्येऽपि कलिमेव स्तौति कविः एवम् –

असतामभितां शक्तिं ददते द्यते तमः।
हरते हरतेजोऽपि कलये कलये नमः॥1॥

'कलिः दुष्टेभ्यः अधिकां शक्तिं ददाति। तमोगुणं वर्धयति। हरस्य तेजः अपि सः अपहरति। तस्मै कलये नमः' इति।

कलिकालोऽयं नितरां क्रूरः। यतः –

छिनत्ति धर्मं हरति प्रशान्तिं सत्यं भिनत्त्यास्तिकतां निहन्ति।
क्षमां ग्रसत्येव दयां धुनोति कालः कलिः क्रूरतरक्रियोऽयम्॥

कलिकाले जनानां दैवभक्तिः न भवति, पापभीतिरपि न भवति। परदारगमने लज्जैव न भवति तेषाम्। दुष्टकार्ये एव प्रवृत्तिः भवति। सज्जनेषु च असूया भवति।

कलिकाले संस्कृतभाषायाः ह्रासः भवति इत्यपि सः लिखति –

सर्वान्यभाषोपचयोपकर्त्रीं या रम्यभावार्थरसाढ्यशब्दा ।
तां घ्नन्ति गीर्वाणगिरं वराकाः कलेः किलेयं कुटिलप्रवृत्तिः ॥5॥

राज्ये दुष्टाः अन्याय्येन शासनं कुर्वन्ति । प्रजाः नानाविधैः भयैः अक्रान्ताः भवन्ति । सर्वविधाः क्लेशाः सम्भवन्ति । इत्थं कलिकालमाहात्म्यम् अत्र सम्यक् वर्णितमस्ति ।

7. दारिद्र्यमहिमा –

कविः शिङ्गरार्यः जीवने स्वयमपि दारिद्र्येण अभिभूतः आसीदिति सः एव तत्र तत्र लिखितवानस्ति । अतः दारिद्र्यस्य महिमा तेन सम्यक् वर्णितः अस्ति ।

यो दरिद्रो भवति सः समर्थोऽपि नपुंसकः इव, बधिरः इव, मूकः इव, अन्धः इव, अज्ञः इव, चोरः इव, नीचः इव, शठः इव च व्यवहरति ।

क्लीबति बधिरति मूकत्यन्धत्यज्ञति नरं समर्थमपि ।
चोरति नीचति शठति प्रबलतरं हन्त ! दारिद्र्यम् ॥ 2॥

कविना अत्र द्वौ प्रसङ्गौ वर्णितौ यौ च दारिद्र्यस्य परां काष्ठां सम्यक् वर्णयतः ।

एतद्गेहमहानसस्य पुरतो वातायनस्यान्तिके
बालैस्साकमिहोपविश्य कुरुते किं विप्र नित्यं भवान् ।
निस्स्वोऽहं धनिनोऽस्य सूदरचितैर्भक्ष्यादिभिर्जायते
यो गन्धो रुचिरश्च तेन पृथुकान् सन्तोषयाम्यन्वहम् ॥4॥

कश्चन विप्रः बालैः सह कस्यचित् धनिनः गृहस्य पुरतः पाकशालासमीपे प्रतिदिनम् उपविशति । तं दृष्ट्वा कश्चन पृच्छति – 'भोः विप्र ! किमर्थम् एवं करोषि ?' इति । विप्रः वदति – 'अहं निर्धनः । मम गृहे सर्वदा उपवासः । अस्य धनिनः गृहे तु पाचकाः प्रतिदिनं नानाविधानि खाद्यानि कुर्वन्ति । अत्र उपविशामश्चेत् तेषां सुगन्धं घ्रातुं शक्नुमः । अतः मम बालान् अत्रानीय तस्य सुगन्धस्य आघ्राणनं तेभ्यः कल्पयामि' इति । 'खादन–सौभाग्यं तु नास्ति । घ्राणनं वा भवतु' इति निर्धनस्य तस्याशयः !

नग्नामष्टशरद्वयःपरिमितां लज्जान्वितां मत्सुतां
वीक्ष्यादात्कृपयैव काचिदबला हेमन्तकालेऽम्बरम् ।
दैवं हि प्रबलं विशोध्य सलिले तच्छोषयाम्यातपे
यावत्तावदुपेत्य हन्त कपयस्तत्खण्डशोऽखण्डयन् ॥5॥

निर्धनः कश्चिदपरः अष्टवर्षीयायै स्वपुत्र्यै वस्त्रमपि दातुं न शक्तः । लज्जाम् अनुभवन्तीं नग्नां तां दृष्ट्वा काचित् महिला करुणया किञ्चित् वस्त्रं दत्तवती । तत् प्रक्षाल्य यदा

शोषणार्थमातपे स्थापितं तदा कपयः तत्रागत्य तत् खण्डशः कृतवन्तः । दैवप्राबल्यम् एवमस्ति इति कविः निर्णयति ।

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके
वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितः तत्रैव यान्त्यापदः ॥

इत्यस्य सुप्रसिद्धस्य भर्तृहरिविरचितस्य सुभाषितस्य संवादी अस्ति अयं श्लोकः ।

8. चटककुटीरम्

कविः शिङ्गरार्यः पर्यावरणप्रेमी आसीत् । स्वं परितः यत् दृश्यते, यच्च प्रवर्तते तद्विषये सः सर्वदा जागरूकः भवति स्म । भावुकेन मनसा तत् पश्यति स्म च । ततः प्रेरणां प्राप्य काव्यं रचयति स्म । स्वगृहे नीडं कृत्वा वासं कृतवतां चटकानां विषयेऽपि चिन्तयन् सः काव्यमिदं चकार ।

कवेः गृहे चटकाः निर्भयेन वसन्ति स्म । ते तस्य करतलमागत्य, धैर्येण उपविश्य तण्डुलान् खादन्ति स्म । तस्य गृहं 'चटककुटीरम्' इत्येव प्रसिद्धमासीत् । परं कदाचित् तत्रागतः कश्चन मार्जालः चटकानां मारणमकरोत् । तेन कविः नितरां दुःखितोऽभवत् । 'शोकः श्लोकत्वमागतः' स्यात् । लघु काव्यमिदं रचितमभूत् । इदानीं पुनः नीडं रचयितुम् आगतमपि चटकं सः इत्थं वारयति –

अपसर चटक ! सुदूरं शयनगृहे मे सुरक्षितं नीडम् ।
कर्तुं यतसे तेऽरिः हर्तुं त्वामोतुरीक्षते समयम् ॥4॥ इति ।

9. कविकाङ्क्षा –

स्वसदृशाः कवयः किं वाञ्छन्तीति शिङ्गरार्यः अत्र निरूपितवानस्ति । कवीनां नूतनाः कृतयः पण्डितानां मनः रञ्जयन्ति । कवयस्तु सहृदयानां श्लाघनमेव वाञ्छन्ति, नान्यत् । 'सहृदयरसिकानां श्लाघनं यत्तदर्थं तदिह कविवराणां एतदेकं हि भाग्यम् ।'

महाकविः भवभूतिः अपि स्वस्य जीवितकाले अवज्ञापात्रतां गतः असीदिति कविः जानाति । अतः सः इत्थं लिखति –

ये नाम केचित् प्रथयन्त्यवज्ञाम्
अस्माकमित्याह महाकविस्सः ।

एवं स्थितेऽस्मत्कवितां नवीनां को वा
बुधो नन्दति वीक्ष्य साक्षात् ॥2॥

(ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैषः यत्नः ।
उत्पत्स्यते मम तु कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥
भवभूतिः – मालतीमाधवे)

तादृशस्य महाकवेः अपि परिस्थितिः यदि तादृशी, तर्हि अस्मादृशानां नव्यानां कवितां पठित्वा के वा सन्तोषमनुभवेयुः इति तस्य चिन्ता । अतः अग्रे सः एव सूचयति –

नवमपि यदि काव्यं ज्ञानदं साधुरम्यं
ननु विबुधजनैस्ते पालनीयं प्रयत्नैः ।
तदिह सकलविद्यापाठशालासु तत्तत्
पठननियमनार्थं चाग्रहो द्राग्विधेयः ॥3॥

काव्यम् आधुनिकं चेदपि यदि रम्यमस्ति तर्हि विबुधजनैः तदवश्यं रक्षणीयम् । अन्यच्च सर्वास्वपि पाठशालासु पाठ्यत्वेन तत् कल्पनीयम् । तेन वा केचन तत् पठेयुः इति । प्रायः सर्वेषामपि कवीनाम् एषा अपेक्षा भवति एव ।

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥' – *(मम्मटः काव्यप्रकाशे)*

इत्येवं शास्त्रकाराः अवदन् । तत्तु सत्यमेव । परं यदि काव्यं कर्त्रा सहैव नष्टं भवति तर्हि दुर्विधिरेव इति अन्ते सः वदति –

यशसेऽर्थकृते काव्यम् इति तत्त्वविदोऽवदन् ।
कर्त्रैव सह सत्काव्यं नष्टं चेत् हन्त दुर्विधिः ॥4॥ इति ।

10. सत्काव्यमहत्त्वम् –

उत्तमस्य काव्यस्य महत्त्वं शिङ्गरार्यः सम्यक् वर्णितवानस्ति अत्र । शास्त्रज्ञाः अपि यदि कवितामर्मज्ञाः न भवन्ति, तर्हि ते मुदं नाप्नुवन्ति इति कवेः अभिप्रायः ।

शास्त्रेषु शक्तः कवितास्वशक्तः न वेत्ति काव्यामृतपानसौख्यम् ।
वादाय शास्त्रं न मुदे तत् प्रहर्षदः काव्यरसो बुधानाम् ॥

काव्यप्रयोजनानि सः इत्थं लिखति –

मनःप्रसादं च धियः प्रबोधं
सत्कर्मनिष्ठां जगतः स्वरूपम् ।

अत्रापि चामुत्र च सौख्यसिद्धिं
सत्काव्यमेकं कुरुते न चान्यत् ॥3॥

'काव्यालापांश्च वर्जयेत्' इति प्राचीना या उक्तिः अस्ति, तस्याः अर्थस्तु निन्द्य-काव्यानां विषये एव तादृशः निषेधः इति सः अभिप्रैति –

काव्यालापान् वर्जयेदेवमुक्तं यत्तद्युक्तं निन्द्यकाव्याय नान्यत् ।
एवं नो चेत् आदिकाव्यं कुतो वा सर्वैरर्च्यं भाति रामायणं तत् ॥6॥

* * * * *

परस्परसम्बन्धरहितानि विशकलितानि पद्यानि अपि शिङ्गरार्येण तदा तदा रचितानि सन्ति । संस्कृतसाहित्ये तादृशानि 'मुक्तकानि' इत्युच्यन्ते । शिङ्गरार्यविरचितानि कानिचित् मुक्तकानि अतीव विशिष्टानि सन्ति । तेषु कानिचित् अत्र परिशील्यन्ते –

1. अपूर्वः सन्देशः –

अविवाहितान् जनान् उद्दिश्य शिङ्गरार्यः अपूर्वं कमपि सन्देशं वदति इत्थम् –

भो भो मानव ! मा नवं भज महादुःखं विवाहात्मकं
प्राक्सौख्यभ्रमदं क्रमेण विषमं नानाविपत्कारणम् ।
गर्भावासजनिक्षुधामयमुखानेकव्यथापीडितः
प्रागेवासि हतः कुतः पुनरसावाध्यात्मतापो नवः ॥

'हे मानवाः ! विवाहात्मकं महादुःखं मा भजत, यतः तत्र आरम्भे सुखानुभवस्य भ्रमः भवति चेदपि पश्चात् नानाविधानि दुःखानि भवन्ति । इदानीमेव नानाविधैः दुःखैः पीडिताः यूयं पुनः नूतनं दुःखं मानुभवत' इत्येषः सन्देशः निश्चयेनापि अपूर्वः एव !

2. निद्रास्तु भद्राय नः

विद्यायाः महत्त्वप्रतिपादकं 'विद्या नाम नरस्य रूपमधिकम्..' इत्यादि भर्तृहरेः पद्यं लोके नितरां प्रसिद्धम् । तदनुसृत्य निद्रायाः महिमानं वर्णयता शिङ्गरार्येण विडम्बनात्मकं पद्यमिदं निबद्धमस्ति ।

निद्रा नाम नरस्य भूरि सुखदा निद्रा जनैकप्रिया
निद्रा देहपरिश्रमं हरति सा निद्राखिलैरीप्सिता ।
निद्रा स्वप्नजगद्भवैश्च विभवैरानन्दयत्याश्रितान्
निद्रा निर्जरदुर्लभा भगवती निद्राऽऽविहीनः सुखी ॥

3. नरकः –

मत्कुणाः मशकाः रात्रौ दिवा सर्वत्र मक्षिकाः ।
देहमाक्रम्य बाधन्ते नर ! को नरकोऽपरः ॥

मत्कुणादिभिः कीटैः पीड्यमानस्य नरस्य चित्रणमिदम् । 'नर को नरकोऽपरः' इत्यत्र प्रयुक्तः श्लेषः नितरां मनोहरः अस्ति ।

4. सुकृती कुम्भः –

भोः कुम्भ ! स्तनकुम्भयुग्मनिकटे तन्व्या भुजालिङ्गितः
काञ्चीबन्धनसूक्ष्ममध्यमतले पीनं नितम्बं श्रितः ।
तद्दत्तेन मुहुस्त्वमच्छमधुरेणाकण्ठमापूरितो
जीवाधाररसेन भासि सुकृतिन् तप्तं त्वया किं तपः ॥

शृङ्गाररसस्य उत्तममुदाहरणमिति पद्यमिदं दर्शयितुं शक्यम् ।

व्यावलगत्कुचभारमाकुलकचं व्यालोलहारावलि
प्रेङ्खत्कुण्डलशोभिगण्डयुगलं प्रस्वेदि वक्त्राम्बुजम् ।
शश्वद्दत्तकरप्रहारमधिकं श्वासं सृजन्त्याः सखे !
यस्मात् ! कन्दुक सादरं सुभगया संसेव्यसे तत्कृती ॥ *(कुवलयानन्दे)*

शिखरिणि क्व नु नाम किमभिधानमसावकरोत्तपः ।
सुमुखि ! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः ॥ *(ध्वन्यालोके)*

इत्येतयोः प्रसिद्धयोः पद्ययोः प्रभावं साम्यं च अस्मिन् पद्ये अभिज्ञातुं शक्नुमः ।

5. काषायवासः –

वञ्चनासिद्धिवेषाय नमः काषायवाससे ।
कलौ येनाद्य बहवो रावणार्जुनवृत्तयः ॥

पद्यस्यास्य स्वारस्यं स्वयमेव वेद्यं भवति सहृदयैः । एतादृशानि बहूनि मुक्तकानि शिङ्गरार्येण विरचितानि सन्ति ।

ई. उपसंहारः

संस्कृतसाहित्यं प्रति कविवरस्य जग्गु शिङ्गरार्यस्य योगदानं महदेव अस्ति । तेन विरचितानां सर्वेषामपि काव्यानां परिशीलनेन एतत् स्पष्ट भवति । गद्यं पद्यं चम्पूः नाटकं चेति सर्वेऽपि काव्यप्रकाराः तेन स्वकृतिभिः संवर्धिताः सन्ति । तस्य कृतयः एताः सन्ति –

नाटकानि – 1. शौरिशौर्यम् 2. यक्षप्रश्ननाटकम् 3. धर्मव्याधदर्शनम्
चम्पूकाव्यम् – 1. यदुशैलचम्मूः
पद्यकाव्यानि – 1. दाशरथिचरितम् 2. श्रीकृष्णकथारहस्यम् 3. काव्यकलापः
– (प्रथमः भागः, द्वितीयः भागश्च)

एतदतिरिच्य शिबिवैभवं, स्वागतपद्यमाला, नवरत्नपद्यमाला, नाल्वडिकृष्णराजकृतकर्णाटकराज्यसमृद्धियत्नसफलताप्रबन्धः – इत्यादयः कृतयः अपि तेन रचिताः सन्ति, याः अद्य मुद्रितरूपेण नोपलभ्यन्ते। (कन्नडभाषायामपि अनेकाः कृतयः तेन रचिताः सन्ति। परं ताः अत्र न परिगणिताः।)

शिङ्गरार्यस्य सर्वासामपि कृतीनामध्ययनेन एवं भासते यत् तस्य संस्कृतभाषायाम् अपारं सामर्थ्यं, कल्पनायां परमं नावीन्यं च आसीत्। तस्य भाषाप्रयोगविषये अवश्यम् उल्लेखनीयः कश्चन अंशः एष अस्ति यत् समग्रेऽपि तदीये साहित्ये कुत्रापि भाषागताः दोषाः न दृश्यन्ते। बहूनामाधुनिककवीनां कृतिषु सामन्यतः ये दोषाः दृश्यन्ते ते सर्वथात्र न दृश्यन्ते। तन्नाम शिङ्गरार्येण संस्कृतभाषा बहु समीचीनतया स्वायत्तीकृता आसीत्।

शिङ्गरार्यस्य काव्यविषये विख्यातेन संस्कृतविदुषा महामहोपाध्यायेन एन्. रङ्गनाथशर्मणा प्रकाशितः अभिप्रायः एवमस्ति –

‘शिङ्गरार्यविरचिताः प्रबन्धाः विदुषां हृदयावर्जकाः सन्ति। छन्दोबन्धने अयं कविः नितरां कुशलः। एतस्मिन्नपि काले संस्कृतेन एवं सलीलं पद्यानि रचयितुं शक्ताः ईदृशाः कवयः सन्ति इत्येतदेव भारतीयानामस्माकम् अभिमानास्पदम्। शिङ्गरार्यस्य काव्यानि प्राचीनानां महाकवीनां शैलीमेव अनुसरन्ति इति तु नातिशयोक्तिः’ इति।

(श्री जग्गु शिङ्ग्रैय्यङ्गार्यर जीवनचरित्रे – पुस्तके)

तस्य ग्रन्थानामादौ ये ये प्राक्कथनं पूर्वभाष्यं वा लिखितवन्तः तेषां सर्वेषामपि एषः एव अभिप्रायः। परं शिङ्गरार्यस्य कृतीनां सर्वासामपि उचितः विमर्शः जातः इति न भासते। यतः यद्येवं स्यात् तर्हि अद्य सर्वेऽपि संस्कृतज्ञाः शिङ्गरार्यस्य कृतीनां परिचयं प्राप्तवन्तः स्युः।

दौर्भाग्यस्यायं विषयः अस्ति यत् योग्यतायां सत्यामपि शिङ्गरार्येण स्वजीवितावधौ निरीक्षितप्रमाणेन ख्यातिः धनादिकं वा न प्राप्तम्। (जग्गू वकुलभूषणापरनामधेयेन तदनुजेन, प्रतिज्ञाकौटिल्यादिनाटकानां प्रणेत्रा जग्गू आळ्वार् अय्यङ्गार्येण तद् ईषद्वा प्राप्तमित्येषः सन्तोषस्य विषयः।) परं तद्विषये शिङ्गरार्यस्य दुःखं न आसीत्। तस्य दुःखं तु तत्र आसीत् यत् स्वकाव्यानि मुद्रितानि भूत्वा सहृदयान् वाचकान् न प्राप्नुवन्ति

इति। प्रायः स्वकीयस्य एकैकस्यापि ग्रन्थस्य मुद्रणार्थं प्रकाशनार्थं च तेन महान् प्रयासः एव कृतः स्यात्। (प्रतिग्रन्थं प्राक्कथने सः तदेव निवेदयति।) तद्विषये दुःखेन अन्यत्र सः इत्थं लिखति –

यशसेऽर्थकृते काव्यम् इति तत्त्ववेदिनोऽवदन्।
कर्त्रैव सह सत्काव्यं नष्टं चेत् हन्त दुर्विधिः॥ इति।

शिङ्गरार्यस्य जीवितकाले अस्य लेखकस्य तस्य च सम्पर्कः आसीत्। शिङ्गरार्यः तदा तदा स्वकाव्यानां स्वारस्यं वर्णयित्वा अन्ते एतद् वदति स्म यत् 'एतेषां काव्यानां स्वारस्यं के वा अनुभवेयुः इत्येव मम चिन्ता' इति।

यदि तेन लिखितानां ग्रन्थानां प्रकाशनार्थं केऽपि अधिकमार्थिकं साहाय्यं कृतवन्तः स्युः तर्हि इतोऽपि अनेकानि काव्यानि सः लिखितवान् स्यात् इति भासते।

अधुनातने काले संस्कृतकाव्यानां पठितारः न्यूनाः इत्यनुभवः शिङ्गरार्यस्य आसीदेव। अतः अधुनातनानां कवीनां काव्यानि यदि उत्तमानि सन्ति, तर्हि तानि पाठशालासु विद्यालयेषु वा पाठ्यपुस्तकरूपेव निवेशनीयानि, येन छात्राः वा तानि पठित्वा आनन्दानुभवं प्राप्तुम् अर्हन्ति इति सः अपरत्र निवेदयति।

शिङ्गरार्यस्य कृतयः निश्चयेनापि पाठ्यत्वेन तत्र तत्र उपयोक्तुं योग्याः। पद्यं, नाटकं, चम्पूः वा यत्किमपि तदीयं काव्यं पाठ्ययोग्यमस्ति इत्यत्र नास्ति संशयः। विद्यालय-पाठ्यपुस्तकनिर्धारणसमितौ तिष्ठन्तः विद्वांसः तद्विषये अवश्यं चिन्तनं कुर्युः।

एवं च कविः जग्गु शिङ्गरार्यः स्वपाण्डित्येन कवित्वेन च संस्कृतसरस्वत्याः भाण्डागारम् इतोऽपि समृद्धं कृतवानस्ति। यद्यपि अद्य सः जीवितो नास्ति तथापि तस्य यशश्शरीरं तु विराजते एव। उक्तं हि ननु सुभाषितकारेण –

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्॥ इति।

इति शम्।

प्रकाशितानि पुस्तकानि (प्रकाशनवर्षानुसारेण)

चम्पूकाव्यम् – यदुशैलचम्पूः (स्वेनैव प्रकाशिता) तुमकूरु – 1932
काव्यकलापः (प्रथमभागः) (स्वेनैव प्रकाशितः) तुमकूरु – 1968
नाटकम् – शौरिशौर्यम्, सुरभारतीप्रकाशनम्, बेङ्गलूरु – 1977
काव्यकलापः (द्वितीयभागः) (स्वेनैव प्रकाशितः) तुमकूरु – 1989

जग्गु शिङ्गरार्यः

कर्णाटकराज्यस्य सुदीर्घे वाङ्मयेतिहासे अतिविशिष्टेन योगदानेन नक्षत्रायमाणाःअनेके महान्तः विद्यन्ते । इदं संस्कृतसाहित्येतिवृत्तं स्वातन्त्र्यपूर्वकालीनयुगस्य संस्कृतसाहित्येतिहासं समीचीनतया चित्रयति। किन्तु स्वातन्त्र्यसङ्ग्रामस्य कालघट्टे प्रवृत्तस्य संस्कृतसाहित्यसर्जनस्य इतिवृत्तरचना सम्यक् न जाता । कालक्रमेण इदम् अन्धकारयुगमिव सम्पद्येत कदाचित् । अस्मात् कारणात् १८५० तः १९५० पर्यन्तम् एकस्य शताब्दस्य कालखण्डे कर्णाटकस्य विविधेषु प्रदेशेषु निवसतां संस्कृतवाङ्मयस्य महत्तां वर्धयितुं कारणीभूतानां महतां योगदानविषये, तेषां जीवनगाथाविषये च शतं पुस्तकानि प्रकाशनीयानि इति अस्माकम् आशयः । अनया योजनया संस्कृतवाङ्मयस्य नवेतिहासः निर्मितः भविष्यति । एतेन, आधुनिकयुगेन सह गतशताब्दस्य सांस्कृतिकबन्धोऽपि दृढो भविष्यति इति मे विश्वासः।

अस्यां ग्रन्थमालायां डा. एच्. आर्. विश्वास–महोदयेन जग्गु–शिङ्गरैय्यङ्गार् महोदयानां संस्कृतयोगदानमधिकृत्य विरचितं पुस्तकमिदं प्राकाश्यं नीयते । विद्वद्वरेण्यः कविः डा. विश्वासमहोदयः निरन्तरं संस्कृतभाषासेवायां रतः शताधिकप्रबन्धकर्ता अनुवादकर्मणि निष्णातः अस्माकं प्रार्थनानुरोधेन ग्रन्थपुष्पिकामिमां अल्पे काले विरचय्य प्रदत्तवानिति तस्मै महाभागाय कार्तज्ञ्यं निवेदयामः ।

प्रो. मल्लेपुरं जि. वेङ्कटेशः, डि लिट्
कुलपतिः

Rs. 50/-

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः,चामराजपेटे,बेङ्गलूरु – ५६००१८